- Title – दीपिका प्रकाश (प्रथमपरिच्छेद)
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 44/ 84 से 134 तक
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning – गाहिप्रत्ययानुपपत्तेः नैन्द्रियाणामात्मत्व-संभवइतिभावः ------ ।
- End – इत्यर्थः श्री श्री श्री इति श्रीदीपिकाप्रकाशे प्रत्यक्षपरिच्छेदः समाप्तः ॥
- Colophon-
- Illustrations -
- Source -
- Subject - दीपिकाप्रकाश (प्रत्यक्षपरिच्छेद)
- Revisor -
- Author -

1. Remarks- अपूर्ण 1 – 83 पेज नहीं हैं।

गाहिप्रत्ययानुप[...]न्द्रियाणामात्मत्वसंभवइतिभावः उक्तार्थमेवप्रकाशयति अत्यर्थं नु
तइति अत्रकर्मधार[...]र्तमानध्वंसप्रतियोगिचाक्षुषाप्रयत्नेनानुभवविषयचक्षुषी
त्यर्थः अस्यस्यानुसं[...]गादिति स्पार्शनाप्रपत्या भेदावगाहिप्रत्यक्षासंभवादि
त्यर्थः इदमुपलक्षणं सौगतानांतु अनित्यत्वाच्छरीरादीनामात्मत्वंमातुनित्यत्वान्म
नसएवात्मत्वमित्या[...]ः तन्नतथासति अहंजानामीत्याकारकात्मविशेष्यकज्ञाना
दिप्रकारकलौकिकप्रत्यक्षाभावप्रसंगात् प्रत्यक्षेमहत्त्वस्यहेतुतयामनसितदभा
वात् चाक्षुषाद्युत्पत्तिकालेमानसोत्पत्तिप्रसंगाच्च मानससामग्र्या अपि अततत्वात्
योगाचारास्तु सर्वविज्ञानमयं तद्द्विविधं प्रवृत्तिविज्ञानमालयविज्ञानं चेति अयंघ
टइत्यादिविज्ञानं घटमहंजानामीत्यादिविज्ञानंच प्रवृत्तिज्ञानमहमित्याकार

८४

गाहि प्रत्ययानुपपत्तेः नेंद्रियाणामात्मत्वसंभव इतिभावः उक्तार्थमेव प्रकाशयति अस्यार्थः नु
तरति अत्र कर्मधारयः वर्तमानध्वंसप्रतियोगि चाक्षुषाश्रयत्वेनानुभवविषयचक्षुषी
त्यर्थः अन्यस्यानुसंधानायोगादिति स्पार्शनाश्रयस्यापि भेदावगाहि प्रत्ययस्यासंभवादि
त्यर्थः इदमुपलक्षणं सौगतास्तु अनित्यत्वाच्छरीरादीनामात्मत्वं मास्तु नित्यत्वात्म
नस एवात्मत्वमित्याहुः तन्न तथा सति अहं जानामीत्याकारकात्मविशेष्यकज्ञाना
दिप्रकारकलौकिकप्रत्यक्षाभावप्रसंगात् प्रत्यक्षे महत्त्वस्य हेतुतया मनसि तदभा
वात् चाक्षुषाद्युत्पत्तिकाले मानसोत्पत्तिप्रसंगाच्च मानससामग्र्या अपि अक्षतत्वात्
योगाचारस्तु सर्वविज्ञानमयं तद्द्विविधं प्रवृत्तिविज्ञानमालयविज्ञानं चेति अयं घ
ट इत्यादिविज्ञानं घटमहं जानामीत्यादिविज्ञानं च प्रवृत्तिज्ञानमहमित्याकार

वि

राम
८४

चार्वाकैकदेशीमतं तत्र मृतशरीरे ज्ञानत्वाभावेन व्यभिचारात् तद्धर्मीत्यादि प्रतीत्या मरणपर्यंतं यानि इंद्रियाणीति ... तान्येवात्मेति केचित्

लोचनात्मकानि निर्विकल्पकज्ञानसाधनत्वान्नात्मा किंतु सविकल्पकसाधनत्वात् मनएवेति ... केचित् अन्यानींद्रियाणि आ

न.प्र. सर्वदा प्राणस्यैकरूपत्वात् ... अप्यिंद्रियाभावे पि सत्त्वात् मनएवात्मेति केचित् ... प्राणस्य वात्मेत्यपरे =

ग्राहि प्रत्ययानुपपत्तेः नेंद्रियाण्यात्मत्वं संभवंतीति भावः उक्तार्थमेव प्रकाशयति अन्यथेमु तु तस्मिन् अत्र कर्मधारयः वर्तमानदेहप्रतियोगिकादृष्टाश्रयत्वेनानुभवविषयचतुष्टी त्यर्थः अन्यस्यानुसंधानायोगादिति स्पार्शनाश्रयस्य भेदाद्वग्राहि प्रत्यक्षासंभवादि त्यर्थः इदमुपलक्षणं लोगनान्तु अनित्यत्वाद्भुतादीनामात्मत्वं मास्तु नित्यत्वाम् नस एवात्मत्वमिष्यताम् तन्न तथा सति अहं जानामीत्याकारकात्मविशेष्यकज्ञाना दिप्रकारकलौकिकप्रत्यक्षाभावप्रसंगात् प्रत्यक्षे महत्त्वस्य हेतुतया मनसि तदभा वात् चाक्षुषादौ त्वतिकाले मानसोत्पत्तिप्रसंगाच्च मानसस्यामध्या अपि अदृष्टत्वात् योगाचारास्तु सर्वविज्ञानमयं तद्विविधं प्रवृत्तिविज्ञानमालयविज्ञानं चेति अयंघ टइत्यादिविज्ञानं घटमहं जानामीत्यादिविज्ञानं च प्रवृत्तिज्ञानमहमित्याकार

वि

वाहं स्वत्वंस्त्वं चैतन्यविशिष्टः कायः पुरुषः कामादिविकः पुरुषार्थः मरणमेवापवर्गः तदुक्तं प्रमाणमेकं प्रत्यक्षं तत्र चैतन्यं च चतुर्भ्यो भूतेभ्यः मरणमेवापवर्गः कामार्थौ पुरुषार्थौ नहि ख
ल्वीश्वरः कर्ता परलोककथा वृथा देहं विनात्मा चेदात्मा कुंभवद्रूपवान्पुरः स्थो दीर्घो वा बाल इति देहे दृश्यते आत्मा ज्ञानतः परिणतो वृद्धः ज्ञानी नतः स्थूलत्वे च मुक्ता
प्रत्यय विकारादेहं स्थूलः बालगच्छामि देहे देवप्रतिष्ठितः ज्ञानकर्मादिसंस्कारादेहस्यैव विधीयते ध्यातं नीवेति देहस्य प्रवृत्तस्यापीषं स्वभं =

यस्य पूर्वशरीरस्य नष्टत्वात् तस्य स्थाननुभूतार्थस्मरणासंभवादिति भावः
अत्र चक्षुरादिकारणत्वेन रूपज्ञानं च चक्षुरादीनामेव ज्ञानाश्रयत्वं चोत्क्षिपतां
चक्षुर्जानातीति प्रत्ययात् अतश्चक्षुरादिकमेवात्मेति बौद्धा वदंति तन्मतं दूषय
ति नापीन्द्रियाणामिति अपिना शरीरपरिग्रहः यथा शरीरस्यात्मत्वं नास्ति तथेन्द्रि
याणामात्मत्वं नास्तीत्यर्थः तत्र हेतुमाह योहं घटमद्राक्षमिति योहं घटादिविष
यकवर्तमानध्वंसप्रतियोगिचाक्षुषवानित्यर्थः सोहमिदानीं स्पृशामीति
घटादिविषयकवर्तमानस्पार्शनवानहमित्यर्थः इत्यनुसंधानाभावप्रसं
गादिति इत्याकारकचाक्षुषाश्रयस्पार्शनाश्रययोरभेदावगाहिप्रत्यक्षाभाव
प्रसंगादित्यर्थः तथाच चक्षुस्त्वगादिरूपेंद्रियाणां परस्परभिन्नतयाऽभेदाव

मते तादात्म्यस्य वृत्तिनियामकत्वात् न चात्मनः क्षणिकत्वात् कालांतरे स्मरणानुपपत्तिः अ
नुभवाश्रयस्यात्मनो नष्टत्वादिति वाच्यम् तथापि पूर्वानुभवजन्यसंस्कारालयपूर्वालयवि
ज्ञानजन्योत्तरालयविज्ञाने संक्रांतत्वीकारेण स्मरणस्य प्रत्यभिज्ञानुपपत्तिविरहात् तस्मा
त् क्षणिकविज्ञानमेवात्मेत्याहुः तन्न आत्मनो क्षणिकविज्ञानरूपत्वे संस्काररूपवास
नायाः क्रियारहितत्वात् प्रवेशासंभवात् संक्रमणाभावेन कालांतरे स्मरणाद्यनुपपत्तिप्र
संगात् न च पूर्वपूर्वालयविज्ञानजन्योत्तरोत्तरालयविज्ञाने पूर्वपूर्वालयविज्ञा
नसंस्कारैः संस्कारांतरोत्पत्तिस्वीकारान्न स्मरणानुपपत्तिरिति वाच्यम् समानविष
यकानुभवस्यैव संस्कारहेतुत्वेन उत्तरालयविज्ञाने पूर्वानुभवरूपकारणाभावेन
तादृशसंस्कारोत्पत्त्यसंभवात् न च यत्सत् तत्क्षणिकमिति व्याप्तिभंगीकृत्य तदनु
रोधेन जगत् आत्मनः क्षणिकत्वांगीकारे योगाचारमते समानविषयकाभिलाल

कमालयविज्ञानं सणदात्माभावमात्रस्वद्दाधिकत्वात् आत्मापि तादृशिक एव न चालय
विज्ञानस्यात्मत्वे गुणगुणिनोरङ्गीकारे ज्ञानस्य ज्ञानसुखादिमत्त्वासंभवात् ज्ञानामीत्याद्यनु
व्यवहारायानुपपत्तिरिति वाच्यम् सर्वज्ञविज्ञानसुखादीनां आलयविज्ञानाकारविशे
षरूपत्वेन तस्य [illegible] तादात्म्यसंबंधेन तादृशज्ञानादिमत्त्वेनोक्ता
नुपपत्तिविरहात् तदाकारत्वं च तद्भिन्नत्वे सति तद्भिन्नत्वेन भासमानत्वं यथा मद
भिन्नत्वे सति मद्भिन्नत्वेन भासमानत्वाद्घटस्य मदाकारत्वं एवं च मदहन्तादात्म्यसं
बंधेन घटवत्त्वाद्घटवानहमिति प्रतीत्युपपत्तिः न चैतादात्म्यस्याधिकारणत्वाति
यामकतयाकल्पना दृशप्रतीत्युपपत्तिरिति वाच्यम् समवायमनङ्गीकुर्वता मयाव
यावयविनो गुणगुणिनोः क्रियाक्रियावतोश्च तादात्म्यसंबंधमङ्गीकुर्वता

यज्ञानजन्यज्ञानपरंपरायाः तादृशानुभवाभिन्नास्मृत्यादिज्ञानप्रयोज्यज्ञानत्वेन हेतुत्व
स्वीकारेण तादृशपरंपरानुसंधानतोत्पत्तौ बाधकाभावः इति वाच्यम् एकत्राप्रामाणिका
नंतसंस्कारकल्पनापेक्षया तादृशव्याप्तिमनंगीकृत्यातिरिक्त एकैकात्मकल्प
नाया एव लघुत्वादित्यपि बोध्यम् तस्मादिति जीवस्य देहेंद्रियमनः क्षणिकरूपत्वा
संभवादित्यर्थः देहेंद्रियादिव्यतिरिक्त इति देहेंद्रियादिभिन्न एवेत्यर्थः आदिपदेन म
नः क्षणिकविज्ञानयोः परिग्रहः सुखदुःखादिवैचित्र्यादित्यादि एतस्यार्थः जीवः
प्रतिशरीरं भिन्न इति मूलार्थ इत्याक्षेपः अत्र जीवो महान् द्रव्यम् इति लौकिकविषय
तासंबंधेन प्रत्यक्षत्वात् घटवदित्यनुमानात् प्रत्यक्षमहत्वयोः कार्यकारणभावग्र
हात्मकानुकूलतर्कसहकृता जीवस्य महत्वं साधयितुं विषयपरिशोधकतर्कमप्या
ह स च न परमाणुरिति जीवो महत्ववानेवेत्यर्थः शरीरव्यापीति अन्यथेत्यादिः शरीरेति

मे वेदनापादे मे सुखमित्यादिशरीरावदवयवघटकप्रत्येकावयवावच्छेदे सुखदुःखदे
र्शादिनिष्ठलौकिकविषयताशालिसमूहालंबनात्मकसाक्षात्कारानुपपत्तिप्रसंगादित्यर्थः
जीवस्याणुत्वे चैकदा शिरःपादादिना संबंधासंभवादित्यर्थः इदमुपलक्षणम् लौकिक
विषयताशून्यत्वप्रसंगादित्यपि बोध्यम् श्रमस्य कुठचरणेनानु शरीरव्यापीति शरीरावच्छे
द इत्यर्थः इदं च सुखाद्यनुभवः शरीरावच्छेदे इति स्फुटीकरणाय न तु तस्यापाद्यघटकता
व्यर्थत्वात् सुखदुःखादीति सुखदुःखादिनिष्ठलौकिकविषयताशालिसाक्षात्काराविष
यत्वप्रसंगादित्यर्थः इदमपि योग्यविभु[illegible]शेषगुणत्वं धेनैवात्मनः प्रत्यक्षत्वेन त्वम
प्येति स्फुटीकरणाय न तु तस्यापाद्यकोटिप्रवेशः व्यर्थत्वात् किंतु साक्षात्काराविषयप्र
संगादित्येवापादयामि तिव्याचक्षुः नमध्यमपरिमाणवानिति नापकर्षाश्रयमहत्त्ववा
नित्यर्थः तथा सति जीवस्य तादृशपरिमाणवत्त्वस्वीकारे इत्यर्थः आनित्यत्वेनेति अ
नित्यत्वप्रसंगेनेत्यर्थः मध्यपरिमाणवत्त्वलिंगेन घटादिवदस्यानित्यत्वं सिध्यतीति

स एव महाकाल इत्युच्यते इत्यभिप्रायेण स एको विभुर्नित्यश्चेत्युक्तमित्यपि बोध्यं एतेनत
पनपरिस्पंदानामेवातीतादिव्यवहारकारणतावच्छेदकघटकत्वसंभवान्न तेन
महाकालसिद्धिरिति केषांचिद्दूषणं प्रत्युक्तं प्रकारांतरेण महाकालस्य साधितत्वात
मूले महाकालस्य लक्षणाप्रतिपादनात् न्यूनतापरिहाराय स्वयं लक्षणमाह दी-
पिकायां सर्वाधार इति सकलपदार्थनिष्ठकालिकसंबंधावच्छिन्नाधेयतानिरू-
पिताधिकरणत्वं महाकाललक्षणमित्यर्थः लक्षणांतरमाह सर्वकार्येति कार्य-
त्वावच्छिन्नकालिकसंबंधावच्छिन्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नका-
रणत्वमित्यर्थः कारणतायां तादात्म्यसंबंधावच्छिन्नत्वोपादानात् अदृष्टेनाति-
व्याप्तिः अदृष्टस्य कालिकसंबंधेनैव हेतुत्वात् अत्र प्रथमलक्षणापेक्षया द्विती

वंधावच्छिन्नावच्छेदकताश्रयघटकतया वा कालत्वसिद्धिरिति भावः ॥ इदमुपलक्षणं समवा-
येन किंचिदवधिककालिकपरत्वे प्रतिविशेष्यतासंबंधेन किंचिदवच्छिन्नतपनपरिस्पंदापे-
क्षयाऽधिकतपनपरिस्पंदवत्ताज्ञानं कारणमिति सर्वसंमतं तपनपरिस्पंदस्य घटादौ सम-
वायादिरूपसाक्षात्संबंधेन स्वसमवायिसंयुक्तसंयोगरूपपरंपरासंबंधेन तत्र तत्प्रकारक-
त्वं वाच्यं एवं च कालिकपरत्वजनकबहुतरक्रियाविशिष्टमिदमिति ज्ञानं परंपरासंबं-
धघटकवस्तुघटितसाक्षात्संबंधाभावे सति विशिष्टज्ञानत्वात् लोहितस्फटिक इति विशि-
ष्टज्ञानवदित्यनुमानात् निरुक्तपरंपरासंबंधघटकवस्तुसिद्धौ पृथिव्यादिचतुर्णां म-
नसश्चाविभुद्रव्यत्वेनैकस्यापि तादृशद्रव्यस्य परत्वाश्रयावच्छिन्नसंयोगाभावात् लाघवम ए-
व लाघवज्ञानसहकृतनिरुक्तानुमानात् नित्यत्वैकत्वविभुत्वाश्रयतया सिद्ध्यतीति

५

लूमा विभूनां तु वृत्तिनियमतया विर-
हात् बहूनां संबंधघटकत्वे गौ-

ज्ञानस्य हेतुतया वाच्यतासंबंधावच्छिन्नतादृशशब्दनिष्ठकार्यतानिरूपितज्ञाननिष्ठका
रणतानिरूपितविषयतासंबंधावच्छिन्नावच्छेदकताश्रयतया महादिक्तिच्छिरिति भावः
इदमुपलक्षणं पाटलिपुत्राकाशपदे तथाप्रयोगस्य पदत्वेदृष्टं तच्च पाटलिपुत्रावधिकका
शीनिष्ठसंयोगपरंपरापेक्षयाधिकसंयुक्तसंयोगपरंपराज्ञानजन्यमिति सकलतंत्रका
रानुमतं प्रयागे काशातः समवायादिसंबंधेन तादृशसंयोगपरंपरावत्त्वस्य वाधितत
यात्वस्य समवायादिसंयुक्तसंयोगरूपपरंपरासंबंधेन तादृशसंयोगसमुदायवत्त्वप्र
कारकप्रयागविशेष्यकज्ञानमेव प्रयागनिष्ठतादृशपरत्वजनकं वाच्यं एवं च प्रया
गनिष्ठतादृशपरत्वजनकं प्रयागविशेष्यकं पाटलिपुत्रावधिककाशीनिष्ठसंयुक्त
संयोगपरंपरापर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणसंयुक्तसंयोगपरंपरा

पलक्षणस्य कारणत्वादिघटितत्वेन गुरुत्वात् निमित्तकारणं चेत्यत्र विकल्पार्थक
श्चशब्दः उक्तकल्पे निर्भरस्य चनायेतिहृदयम् दिशा इति क्रमप्राप्तमाया इत्यादिः लक्ष
णमाहेति प्रमाणमुक्त्वेत्यादिः मूले प्राच्यादीति आदिना प्रतीच्यादेः परिग्रहः अ
त्र प्राचीत्वमुदयाचलसान्निहितमूर्तावच्छिन्नदिक्त्वं अस्ताचलसान्निहितमू
र्तावच्छिन्नदिक्त्वं प्रतीचीत्वं सुमेरुसन्निहितमूर्तावच्छिन्नदिक्त्वमुदीचीत्वं सुमे
रुव्यवहितमूर्तावच्छिन्नदिक्त्वं अवाचीत्वं इति हृदयम् एवं प्राच्यादेर्व्यवहार इ
ति विग्रहे निरुक्तप्राचीत्वादिविशिष्टज्ञानजनकशब्द इत्यर्थलाभः प्राच्यादि
रिति व्यवहार इति विग्रहे प्राचीप्रतीचीत्याद्याकारकशब्द इत्यर्थलाभः तत्र हे
तुः तन्निरूपितकारणतावच्छेदकामित्यर्थः तथा च व्यवहारं प्रतिव्यवहर्तव्य

न. प्र.
११

त्व

लक्षणमाहेति आवर्तकमाहेत्यर्थः मूले ज्ञानाधिकरणमिति समवायेन ज्ञानवत्त्वमात्म
नो लक्षणमित्यर्थः समवायेन ज्ञानस्य लक्षणे आत्माधिकरणपदं इदमुपलक्षणम्
आत्मत्वजातिमत्त्वमपि आत्मनो लक्षणं सुखादिसमवायिकारणतावच्छेदकतया आ
त्मत्वजातिसंभवात् सा जातिरीश्वरेपि किं पक्षे शरीरादिकारणं तरविहेतौ च
तत्र सुखाद्युत्पत्त्यापादनासंभवात् न नित्यस्येत्यादिनियमभंगप्रसंगः नचैवं सति आ
काशादावपि तादृशजातिस्वीकारापत्तिः शरीरादिरूपकारणंतरविरहेतौ च तत्र सुखाद्यु
त्पत्त्यापादनासंभवेन सकलकारणाघटकनित्यस्येत्यादिनियमभंगाप्रसक्तेरिति वा
च्यम् तथापि गगनादौ आत्मेतिव्यवहाराभावेन तादृशजात्यनभ्युपगमात् ईश्व

११

प्रकाशकज्ञानमिदं निष्क्रमपरं परात्मं बंध [illegible] घटकसापेक्षं साक्षात्सं बंधाभावे
सति विशिष्टज्ञानत्वात् लोहितस्फटिक इति प्रत्यक्षवत् इति अनुमानात् लाघवज्ञान
सहकृतात् तादृशपरं परात्मं बंध घटकतया सिद्धस्य कालस्य सिद्धिस्यल्लोकरीत्या तु महद्व्या
नात्मकत्वसिद्धौ नित्यत्वैकत्वविभुत्वाश्रयतया महदादिकस्य प्रतीति एतदभिप्राये
ण साधैकाविभ्वीनित्याधेत्युक्तमिति बोध्यं एतेनोदयगिरिसान्निहितव्यवहितमूर्त्तो
नामेव [illegible] सुमेरुसान्निहितव्यवहितमूर्त्तानामेव परत्वमानोक्ष
दीप्रतीत्यादिव्यवहारजनकतावच्छेदकत्वस्वीकारेण तेन महदादिकसिद्धिरिति केचित्
दूषणमपास्तं प्रकारान्तरेण महदादिशः साधितत्वात् आत्मन इति क्रमप्राप्तस्यैतस्यादिः

पान्यतरविशिष्ट इत्यर्थः प्रकारद्वयमेवाह परमात्मेति भावप्रधाननिर्देशात्परमात्मत्वं जीवत्वं
चेत्यर्थः इतिशब्दस्यार्थभेदोर्थः तस्य प्रकारद्वयेऽन्वयः एवं च परमात्मत्वजीवत्वाभिन्नप्रका
रद्वयान्यतरविशिष्ट आत्मेति समुदितवाक्यार्थः तत्र इति परमात्मजीवयोर्मध्य इत्यर्थः
घटकत्वं सप्तम्यर्थः तस्य परमात्मन्यन्वयः ईश्वर इति सर्वज्ञादिकर्तेत्यर्थः एतेनेश्वरे प्र
माणं दर्शितं तच्चाग्रे स्फुटीभविष्यति सर्वज्ञ इति परमात्मेत्यत्र परमत्वनिर्वचनं तच्च सर्व
विषयकज्ञानवत्त्वरूपं इदमेवेश्वरलक्षणमिति हृदयं अत्रेदशमूलोक्तलक्षणं योगि
ष्वतिव्याप्तिरूपदोषग्रस्तमिति विचिंत्य स्वयं निर्दुष्टलक्षणमाह दीपिकायां नित्यज्ञाना
धिकरणत्वमिति समवायेन नित्यज्ञानवत्त्वमित्यर्थः एतल्लाभायैवाधिकरणपदं इदा
नीं प्रसंगसंगत्या निरीश्वरवादिनं निराकर्तुं आदौ तन्मतमुपन्यस्यति नान्विति ईश्वर

13

रेतुश्रोतात्मव्यवहारानुरोधेनतादृशजातिसिद्धौकारणतावच्छेदकत्वाच्च वस्तुतस्तु आ
त्मपदशक्यतावच्छेदकतयाऽऽत्मत्वजातिसिद्धौ बौध्या अस्मतिवाधकेशक्यता
वच्छेदकतयाजातिसिद्धेः सर्वानुमतत्वात् एतेन सुखादिसमवायिकारणतावच्छेद
कतयान तिप्रसक्तजीवत्वजातेर्बाधकाभावोक्तिः स्यात्तादृशावच्छेदकत्वहेतुना ईश्व
रसाधारणात्मत्वसाधनं कुसृष्टिसंवादकत्वेन गुर्वि नमिति शंकानिरस्ता परन्तु
आत्मनि प्रमाणाभावान्नत्वलक्षणाभिधानमयुक्तमिति तन्न जीवानां प्रत्येकमहंसु
खीत्यादिप्रत्यक्षसिद्धत्वात् सर्व एवात्मानः समर्पिता इति श्रुतिसिद्धत्वाच्च एवमी
श्वरस्यापि आत्मावारे द्रष्टव्य इत्यादिश्रुतिसिद्धत्वाच्च तस्मादात्मसामान्यस्य प्रमाणाति
सिद्धत्वेन नोक्तदोषावकाशः इति सद्विविधः इति निरुक्तलक्षणलक्षितान् आत्मा प्रकारद्व

14

१८

त्वाभावरूपसमवायादिसमेतत्वाभावतादृशसमवायिसमवेतसमवेतत्वाभावरूपसमवाय्यादिनि
रूपितविशेषणत्वाभावएतत्समुदायवत्वादित्यर्थः एतेनविशेषरूपेणसंसर्गत्वानंगीकर्तृप्राची
नमते इच्छावृत्तिदैशिकविशेषणतात्वेनतस्यहेतुतावच्छेदकसंबंधत्वासंभवात् तादृशसंबंधे
स्यनोक्तभेदस्यहेतुत्वमितिदूषणंप्रत्युक्तं नहितीयइति नमानसत्वनिरूपितलौकिकविषयता
वानित्यर्थः तत्रहेतुमाहस्यामिति जीवेत्यर्थः यथाश्रुते ईश्वरे आत्मभेदाभावेन नैयायिकमते
तादृशभेदघटितहेतोः स्वरूपासिद्ध्यापत्तेः सुखेदुःखवदीति आदिनेच्छाद्वेषप्रयत्नानांसंग्र
हः तथाचजीवत्वावच्छिन्नप्रतियोगिताकभेदसुखादिमत्त्वानां तत्समुदायघटकप्रत्येकध
र्मावच्छिन्नप्रतियोगिताकभेदएतद्घटितसमुदायवत्वादित्यर्थः अथवाजीवसुखादिम
पत्त्वां तान्यतमत्वावच्छिन्नप्रतियोगिताकभेदवत्वादित्यर्थः घटवदितिदृष्टांतः पूर्णिपः
नाप्यनुमानमिति अपिशब्दः प्रत्यक्षसमुच्चायकः यथाईश्वरे प्रत्यक्षंनप्रमाणंतथानुमा

सद्भाव इति ईश्वरोऽतीन्द्रियः इत्यर्थः किंप्रमाणमिति भवन्मतेनासिद्ध ईश्वरः प्रमाणसामान्याभाव इति अ
त्र प्रत्यक्षादिप्रमाणविशेषगम्यत्वाभाववत्त्वात् यन्नैवं तन्नैवं यथा घट इति सदृष्टान्तहेतुः पूर्वोक्ति
यः प्रकृतहेतोः स्वरूपासिद्धिशंकांबाधयितुं कूटघटकप्रत्येकाभावं साधयति न तावत्प्रत्यक्ष इति
ईश्वरः [illegible] प्रत्यक्षप्रमाणगम्योनेति फलितार्थः अत्र मानसान्यप्रत्यक्षानिरूपितलौकिकविष
यत्वाभाववमानसानिरूपितलौकिकविषयत्वाभाववत्त्वात् आकाशवदिति सदृष्टान्तहेतुः पूर्वोक्ति
यः तद्धीति प्रत्यक्षप्रमाणगम्यत्वं हीत्यर्थः हि प्रसिद्धौ बाह्यमानतं वेति मानसान्यप्रत्यक्षलौकि
कविषयत्वरूपं मानसानिरूपितलौकिकविषयत्वरूपं वा इत्यर्थः तादृशोभयात्मकहेतु
घटकाभावद्वयं क्रमेण साधयति नाध्यक्ष इति न मानसान्यप्रत्यक्षलौकिकविषयता वा इत्यर्थः
अत्र हेतुमाह अरूपिद्रव्यत्वादिति रूपत्वावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदविशिष्ट
द्रव्यत्वादिति द्रव्यवृत्ति दैशिकविशेषणतासंबंधेन तादृशभेदवत्त्वादिति यावत् नातो विशे
षणविशेष्यभावे विनिगमनाविरहप्रयुक्तदोषः अथवा अरूपिद्रव्यत्वादिति रूपसमवायि

वात्मात्मादीश्वरसाधनासंभवे ऽपि लिंगांतरेणापंपापो ईश्वरसाधनं संभवतीत्याशयेन समाधत्ते:
अंकुरादिकामित्यनेन अंकुरत्वरूपपक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्य
त्वे अंकुरविशेषे ऽस्मदादिकृतिजन्यत्वमादाय सिद्धसाधनरूपदोषप्रसक्तावपि पृथिवीत्वव्याप्य
जातिविशेषांकुरत्वावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् न सिद्धसाधनप्रसक्तिरिति हृदयं
पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वाभिप्रायेण पक्षांतरमाह अ
दीति आदिना पृथिवीत्वादिव्याप्यजातिविशेषरूपधर्म्मकमेयत्वावच्छिन्नपरिग्रहः
सकर्तृकामिति कृतिजन्यामित्यर्थः विशेष्यतासंबंधावच्छिन्नाविशेषात् अदृष्टद्वारा ह
विरादिगोचरास्मदीयकृतिजन्यत्वमादाय नासिद्धसाधनप्रसक्तिः कार्य्यत्वादिति स्ववृ
त्तिमहाकालभेदवाच्च कालिकविशेषणत्वसमवायेतरत्वसत्तावत्वादित्यर्थः प
दिवसमवायसंबंधावच्छिन्नत्वादिविशेषितध्वंससाधारणकार्य्यत्वमेव साध्यतयाभिप्रेतं

17

18

नमपीत्यर्थः ईश्वरोऽनुमानप्रमाणगम्यत्वाभावादिति फलितार्थः तत्र हेतुमाह लिंगाभावादिति
तद्व्याप्यलिंगाभावादित्यर्थः तथाच यत्र यद्व्याप्यलिंगं प्रसिद्धं तत्र तदनुमेयं यथा वह्निव्याप्यधूमा
त्मकलिंगं पर्वते प्रसिद्धमिति भवति पर्वते वह्निरनुमेयः प्रकृते ईश्वरव्याप्यलिंगस्य क्वाप्यनिर्णीतत्वे
न ईश्वरो नकुत्राप्यनुमातुं योग्यः इत्याशयः अत्र संज्ञासंज्ञिसंबंधज्ञानस्यैवोपमानप्रमाणकत्वे
नेश्वरे उपमानप्रमाणकत्वासंभवस्य सर्वमतसिद्धत्वान्न साधितमिति हृदयं इदानीं लौकि
कशब्दानामाप्तोक्तत्वानिर्णयात् तत्प्रमाणकत्वाभावोपि सर्वसम्मत इति श्रुतिप्रमाणकत्वा
भावमेव साधयति नाप्यागम इति आगम ईश्वरसाधको नेत्यर्थः तत्र हेतुमाह तयाविचेति
निर्णीतप्रामाण्यकश्रुतेरभावादित्यर्थः श्रुतेर्निर्णीतप्रामाण्यकत्वाभावादिति यावत् यथा
तेईश्वरप्रतिपादकानेकश्रुतिसत्वादसांगत्यापत्तेः तथाचेश्वरतेच्छरीतत्वेनैव श्रुतिप्रा
माण्यस्य वक्तव्यतया ईश्वरसंदेहे श्रुतेरपि संदिग्धप्रामाण्यकत्वेन निर्णीतप्रामाण्यक
त्वरूपलिंगनिर्णयाभावात् श्रुतेर्नेश्वरसाधकत्वसंभव इति भावः अत्रेश्वरव्याप्यलिंगाभा

तद्वेषतादवस्थ्यमिति वाच्यम् तादृशशरीरे योगादजन्यत्वस्यापि विशेषणात् सौभर्या
दिदेहानां योगादिजन्यत्वया ऽदोषात् एवं हेतुघटकशरीरपदेन तत्तच्छरीरभिन्नत्वेन तच्छ
रीरसमानकालीनत्वयोगाद्यजन्यत्वविशेषणमनावश्यकानि अन्यथात्वरूपासिद्ध्यु
पत्तेः जीवस्य चलनाभावेऽपि कायव्यूहादिदेशादिप्राप्तेषु एकशरीराव[illegible]वच्छेदेन सुखा
द्युपलब्धेर्विभुत्वमंगीकार्यमित्याह विभुरिति अत एव वै भवान्महानाकाशवत्सर्व
गतत्वेति भाष्यमादिप्रमाणं विभुत्वान्नित्यत्वादिभावाऽऽश्यकमित्याह नित्यश्चेति जीवशब्द
प्रतिपाद्यजीवत्वरूपलक्षणस्य स्वरूपमाह सुखापायत्वमिति आदिना दुःखादेः परि
ग्रहः अत्र सुखादिमत्त्वमेव जीवलक्षणं आश्रयकथनं तु समवायेन तस्य लक्षण
त्वलाभायेति हृदयम् अस्मिंश्च लक्षणे तु समवायेन सुखादेर्लक्षणत्वे मुक्तात्मन्य

सकल

व्याप्यापत्तिः अतस्तादात्म्यत्वस्य लक्षणत्वलाभाय प्रमाणकल्पनामिति भावः तुः चार्वा
कमतं दूषयितुमुपन्यस्यति न चेति इत्यादौ सर्वत्राहं प्रत्यय इति आदिनात्तत्रिपोहामि
त्यादेः परिग्रहः इत्याद्यभिन्नस्य कल्लोहमित्याकारकप्रत्ययस्य इत्यर्थः शरीरस्यैव विष
यत्वादिति एवकारेण शरीरातिरिक्तस्य प्रत्ययविषयत्वं व्यवच्छिद्यते तथा च मनुष्य
त्वब्राह्मणत्वादीनां शरीरमात्रवृत्तितया तत्प्रकारकप्रमाविषयाहंपदार्थात्मनः
शरीरस्वरूपत्वावश्यकतया प्रमात्वाभावादात्मनो नातिरिक्तत्वमिति भावः कर
पादादिनाश इति आदिनानासिकादेः परिग्रहः शरीरनाशापादिति पूर्वशरीरनाशा
दित्यर्थः आत्मनोपीति त्वन्मते इत्यादिः अपिशब्द एवार्थे त्वन्मते आत्मन एव नाशा
पत्तेरित्यर्थः न चेष्टापत्तिः पूर्वानुभूतस्य कालान्तरे स्मरणानुपपत्तिः अनुभवाश्र

भावजन्यपरामर्शोत्पत्तानादिजन्यत्वासिद्धो नत्वुटकत्वाना याश्रयत्वस्य जीवानां बाधित
त्वादिति निरीश्वरः एकत्वनित्यत्वाद्याश्रयतया सिध्यतीति समुदितदीपिकाग्रंथतात्पर्यं प्रति
प्रतिभाति निरुक्तानुमानेनेश्वरासिद्धो अर्थात् सर्वज्ञत्वमपि सिध्यतीत्याह सकलेति यणुको
मा पादानपरमाणुविषयकप्रत्यक्षवत्वात् यणुकोपादानसकल परमाणुकादिविषयकप्रत्यक्ष
वत्वाच्चेत्यर्थः सर्वज्ञत्वमपि अतीन्द्रियसूक्ष्मपदार्थविषयकप्रत्यक्षः स्थूलपदार्थविषय
कप्रत्यक्षं कैमुत्यन्यायसिद्धमिति तस्य सर्वज्ञत्वमर्थात्सामर्थ्यादित्यर्थः उक्तानुमाने ईश्वरं
तस्य सर्वज्ञत्वं चानिर्णीयोभयत्र श्रुत्यादिप्रमाणमित्याह यस्सर्वज्ञ इत्यागमोपीति यस्य
ज्ञानमयं तपः सो कामयतेत्यादिश्रुतिपरिग्रहः आपिना निरुक्तानुमानं समुच्चीयते तत्रेति
ईश्वरे सर्वज्ञत्वे चेत्यर्थः जीवस्य लक्षणमाहेति जीवस्य व्यावर्तकधर्मं नानात्वादिकं चा
हेत्यर्थः मूले जीवः प्रतिशरीरं भिन्न इति अत्र जीव इत्यनेन जीवत्ववत्वं जीवलक्षणं ल

२१

ऽपते जीवत्वं च सुखादिमत्वं सुखादिसमवायिकारणतावच्छेदकतया जीवपदशक्यतावच्छेद
कतया वा सिद्ध जातिविशेषवत्वं वेति बोध्यम् जीवानामनेकत्वे ऽनुमानं प्रमाणमाह प्रति
शरीरं भिन्न इति शरीरभेदेन भिन्न इत्यर्थः एतच्छरीरावच्छिन्नजीवः एतच्छरीरभिन्नशरीरा
वच्छिन्नजीवाभिन्न इति यावत् अत्रैतच्छरीरभिन्नशरीरावच्छेदभोगानाधारत्वात् घ
टवदिति सद्दृष्टान्तहेतुः प्राणिपः नवैकस्यैव नानाशरीरसंभवेनैतच्छरीरावच्छि
न्नजीवात्मकपक्षे एतच्छरीरभिन्नजन्मान्तरशरीरावच्छिन्नजीवभिन्नत्वरूपं सा
ध्यं बाधितमिति वाच्यम् साध्यघटकैतच्छरीरभिन्नं एतच्छरीरसमानकालीनत्वस्या
पि विशेषणीयत्वात् प्रकृते जन्मान्तरशरीरस्यैतच्छरीरसमानकालीनत्वाभावे
नादोषत्वात् न चैवमपि सौभर्य्यादेरेकदा शरीरादिसत्वेन निरुक्तसाध्याभावसत्वात्
शत

शरीरे

तदासमवायसंबंधमनिवेश्य निरुक्तोभयसंबंधेन सत्तावत्त्वमेव हेतुरिति हृदयम् अत्र महा
काले व्यभिचारवारणाय स्ववृत्तिमहाकालभेदवत्त्वस्य संबंधघटकतयोक्ता दृशभेदवत्त्वम
भावीयदैशिकविशेषणतया बोध्यं एतेन नतद्दोषस्तादवस्थ्यं आकाशादौ व्यभिचारवा
रणाय कालिकविशेषणत्वस्य संबंधघटकता ध्वंसे व्यभिचारवारणाय समवायस्य संबंधघ
कतेति हृदयम् न चाप्रयोजकत्वशंकाकवलितत्वात् अयं हेतुर्न साधक इति वाच्यम् का
र्यत्वेन कृतित्वेन कार्यकारणभावानुकूलतर्कसत्त्वेन तादृशशंकोत्थानसंभवात् इत्यनु धी.
मानस्येति इत्याकारके न्यायवाक्यजन्यशाब्दबोधोत्तरकालीनमानसप्रत्यक्षस्येत्यर्थः प्रमा
णत्वादिति ईश्वरे प्रापकत्वादित्यर्थः कृतिजन्यत्वसाधनेनैव इच्छाजन्यत्वज्ञानजन्यत्व
साधनेनापि ईश्वरसिद्धिर्भवतीति बोधयितुं कर्तृत्वपदार्थमाह उपादानगोचरेति उपादा
नविषयकेत्यर्थः एतस्यांशेन ज्ञानचिकीर्षाकृतिषु प्रत्येकान्वयः उपादानपदार्थमाह उपा
प

न॰प्र॰
२१

24

दानामिति सकर्तृजन्यत्वं न साध्यं निरुक्तज्ञानादिरूपानंतकार्यत्वानां कारणतावच्छेदकापत्त्या
गौरवात् नापि तादृशज्ञानादिजन्यत्वं दृष्टांतघटसमवायिकारणे घुसर्वैर्वानुगतसमवायिकार
णत्वाभावेनोपादानशब्देन घटादिरूपदृष्टांतसमवायिकारणग्रहणे तद्विषयकतादृशज्ञानादि
जन्यत्वस्य पक्षे बाधितत्वेन हेतोर्बाधितत्वव्यभिचारित्वयोरापत्तिः तत्पदेन पक्षीभूतमेघसम
वायिकारणे तद्विषयकज्ञानादिजन्यत्वस्य दृष्टांते ऽभावेन तदंतर्भावेन व्यभिचारित्वापत्तिः
केवलज्ञानत्वाद्यपेक्षया समवायिकारणविषयकज्ञानत्वादेर्गुरुत्वेनं तस्य कारणतावच्छे न
दकत्वसंभवाच्चातः समवायेन कार्य्यंप्रति विशेष्यतासंबंधेन ज्ञानत्वादिना लाघवात्
कारणत्वं वाच्यम् एवं च ज्ञानत्वेच्छात्वकृतित्वानां मध्ये एकैकधर्मावच्छिन्नविशेष्यता
संबंधावच्छिन्नकार्य्यत्वमेव सकर्तृकशब्देन विवक्षितं साध्यं तथोदृशे तादृशानुमाने
न कार्य्यत्वेन ज्ञानत्वादिना च कार्य्यकारणभावात्मकानुकूलतर्कप्रयोज्यव्यभिचारज्ञाना

राम
२१ म

संगतेः शब्दोपलब्धेरिति उपलभ्यमानशब्दादित्यर्थः उपलभ्यमानत्वविशेषणं तत्तदवच्छे
देन शब्दोत्पत्तौ प्रमाणप्रदर्शनाय न तु तस्यापि हेतुतावच्छेदकताव्यर्थत्वात् तथा च काश्या
द्यवच्छेदेन तत्ताद्यवच्छेदेन च शब्दोत्पत्त्यनुरोधेनाकाशे काश्यादिदेशसंयोगस्य सत्त्वादि
देशसंयोगस्य चावश्यकत्वात् एकस्याकाशस्य तावत्पदार्थसंयोगवत्त्वं विभुत्वं विनाननि
र्वहतीत्यर्थानुपपत्त्या तस्य विभुत्वसिद्धिरिति भावः विभुत्वं निर्वक्ति सर्वमूर्तेति यद्यपि प
रममहत्परिमाणवत्त्वरूपमेव विभुत्वमिति शक्यते वक्तुं तथा च वैभवात्महानाकाश
स्तथा चात्मेति सूत्रे कणादेन परममहत्त्वसाधकलिंगेन विभुत्वस्य प्रतिपादनात्प
रममहत्त्वस्य तत्स्वरूपत्वं सूत्रकारानुमतमिति प्रकारांतरेण विभुत्वनिर्वचनं कृतमि
ति ध्येयम् ननु सर्वमूर्तद्रव्यसंयोगित्वमित्यत्र सर्वाणि यानि मूर्तानि द्रव्याणि ताव

यथा सर्वकार्य्यकर्तृत्वेनासिद्ध ईश्वरस्याद्दशाकर्तृत्वसमानाधिकरणान्योन्याभावप्रतियोगिता
नवच्छेदकैकत्ववत्तयासिद्धः तथा शब्दाश्रयत्वपर्य्याप्त्याकाशत्वमपि लाघवाच्छेदस
मानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकैकत्ववत्तया पर्याप्तिरिति प्रमाणाभावा
न्न तस्य पर्याप्त्यादिवदेकत्वमिति भावः उक्तार्थबोधनाय फलितार्थमाह दीधितिकायां भेद
इति पर्य्याप्तिसंबंधेन द्वित्वादिमत्त्वमित्यर्थः प्रमाणाभावादिति प्रस्तुतधर्मग्राहकानुमा
नस्यैवानिरुक्तैकत्वग्राहकस्य सत्त्वादिति भावः एकत्वादेवेति अप्यर्थक एवकारः वि
भुत्वमित्युत्तरं योज्यः निरुक्तैकत्वाश्रयाकाशादिसमवायिकारणादित्यर्थः सर्वत्रेति सर्वा
वच्छेदेनेत्यर्थः कालविशेषविशिष्टपृथिव्यादिचतुष्टयघटकप्रत्येकावच्छेदेनेति
यावत् सर्वावच्छेदेन सर्वघटकगुणावच्छेदेन वा शब्दो त्यपप्रसिद्धा यथाश्रुता

परतया परमाणूनामेव नित्यमूर्त्तत्वात् सकलपरमाणुघटकप्रत्येकप्रतियोगिकैकैकसंयोगघ
टितसंयोगसमुदायवत्वं विभुसामान्यलक्षणमिति फलितमिति तन्नोक्तदोषप्रसक्तिरित्याहुः
तदुभयमपि मंदं अपेक्षाबुद्धिविषयत्वरूपस्याकाशादिचतुष्टयघटकप्रत्येकमात्रसम
वेततादृशसंयोगसमुदायपर्याप्तसमुदायत्वस्य भिन्नभिन्नतया एकैकतादृशसमुदाय
त्वावच्छिन्नवत्वरूपविभुसामान्यलक्षणस्य वाच्यतासंबंधेन विभुत्वरूपलक्ष्यतावच्छेदका व
अपेऽन्यास्मिन् असत्वात् अव्याप्त्यापत्तेः प्रत्येकसमवेततादृशसंयोगसमुदायचतुष्ट
त्व यपर्याप्तएकसमुदायेऽस्य तादृशसंयोगसमुदायचतुष्टयमात्रविषयकज्ञानविशेष्यत्व
रूपस्य लक्षणतावच्छेदकत्वे तादृशसमुदायचतुष्टयपर्याप्तैकसमुदायस्यैव तादृशसमुदायत्व
रूपलक्षणतावच्छेदकविशिष्टतया कुत्रापि तादृशलक्षणवत्त्वाभावात् असंभवापत्तेः टम

त्प्रतियोगिकसंयोगवत्त्वापर्यकत्वे तावत्प्रतियोगिकसंयोगाप्रसिद्ध्याऽसंभवः तावतांप्रत्ये
कप्रतियोगिकसंयोगसमुदायवत्त्वापर्यकत्वे घटपटसंयोगादेरपि तादृशसंयोगरूप
तया तद्घटितसमुदायवत्त्वस्याकाशादावभावात् तद्दोषतादवस्थ्यं यावंतिमूर्तद्रव्या
णि तेषांप्रत्येकप्रतियोगिकैकैकघटितसंयोगसमुदायापर्यकत्व उत्पन्नत्वेन घटादिव्या
देरपि मूर्तत्वजात्याश्रयत्वेन सर्वमूर्तान्तर्गतत्वेन तत्प्रतियोगिकसंयोगस्याप्यप्रसिद्ध
संयोग त्वेन तद्घटितसमुदायवत्त्वाभावात् तद्दोषतादवस्थ्यमिति चेदत्र प्रांचः एतद्वाक्य
घटकमूर्तशब्दः न जात्यवच्छिन्नपरः किंतु क्रियावत्परः एवं क्रियावत्सकलपदा
क र्थघटकप्रत्येकप्रतियोगिकैकैकसंयोगघटितसंयोगसमुदायवत्त्वं लक्षणमिति
फलितमिति नोक्तदोषइत्याहुः नव्यास्तु प्रकृतवाक्यघटकमूर्तशब्दस्य नित्यमूर्त

घटादेर्गगनाद्यसंयुक्तत्वेपि संयुक्तत्वाभावात् नासंभवः स्वासंयुक्तसंयुक्तकं घटादिसंयुक्तावपि गग
नादेरपि गगनाद्यसंयुक्तसंयुक्तगगनादिकत्वात् न दोष एतादवस्थ्यमिति मूर्त्तेति विशेषणं इदा
नीमं व्यावश्यकमेव इत्थं च स्वासंयुक्तसंयुक्तमूर्त्तकं पदार्थत्वं तत्तद्व्यक्तिभेदकूटवत्त्वं विभुसामान्य
स्यानुगतं लक्षणं फलितमिति न कोपि दोषः इदं च मूर्तपदस्य मूर्तत्वजात्यवच्छिन्नपरत्वाभिप्रा
येण मूर्तपदस्य क्रियावत्परत्वे परमाणुपरत्वे वोत्पन्नविनष्टघटादिकमादायासंभवापत्ते
ः इत्यपदं व्यर्थमेव न चैवमपि रूपादेः संयोगाप्रसिद्ध्या स्वपदेन रूपादे रूपादानासं
भवेन तत्र लक्षणसत्त्वादति व्याप्तितादवस्थ्यमिति वाच्यं तादृशभेदकूटविशिष्टद्रव्य
त्वस्य लक्षणत्वस्वीकारेणातिव्याप्त्यसंभवानवकाशादिति व्याचक्रुः अत्र मूर्तपदस्य
परमाणुपरत्वेपि रूपादावतिव्याप्तिवारणाय तादृशभेदकूटसमानाधिकरणद्रव्यविभा

तादृशसंयोगसमुदायचतुष्टयान्यतमत्वस्य लक्षणतावच्छेदकत्वे ऽन्यतमत्वस्य व्यास
ज्यवृत्तितया समुदायघटकैकसंयोगेपि तादृशान्यतमत्वरूपलक्षणतावच्छेदकसत्वे
न तादृशान्यतमत्वावच्छिन्नवत्वरूपलक्षणस्य घटादावपि सत्वेनातिव्याप्त्यापत्तेः ल
क्षणे द्रव्यत्वनिवेशवैयर्थ्यापत्तेश्च अतः कुचरणास्तु सर्वमूर्त्तद्रव्यसंयोगित्वेन ग
गनादिसंयुक्तमूर्त्तमात्री सर्वो लभ्यते एवं च यत्संयुक्तमूर्त्तकं यद्यत्त्वं तत्तद्व्यक्ति
त्वावच्छिन्नप्रतियोगिताकभेदकूटवत्वं लक्षणमिति फलितं अत्र गगनासंयुक्त

दा मूर्त्ताप्रसिद्ध्या तत्पदेन गगनाद्युपादानासंभवात् लक्षणसमन्वयः गगनादेरपि संयु
क्तगुणादिकत्वात् असंभववारणाय मूर्त्तेत्युक्तं मूर्त्तत्वजात्यवच्छिन्न उत्पन्नविन
ष्टघटादेरपि गगनासंयुक्तत्वात् असंभववारणाय संयुक्तार्थकद्व्यपदं तादृश

कर्षानाश्रयत्वेन परमाणावव्याप्तेः किंतु परममहत्परिमाणभिन्नत्वे आकाशादिचतुष्ट
यान्यतमासमवेतत्वे वा परिच्छिन्नत्वे ... परिमाणवत्त्वं मूर्तत्वमिति फलितं एतल्लक्ष
णस्य गुरुत्वात् लक्षणांतरमाह क्रियावत्त्वमिति क्रियात्वावच्छिन्नं समवायेन लक्षणमि
ति न चैवमुत्पन्नविनष्टघटादावव्याप्तिरिति वाच्यम् क्रियावद्वृत्तिगगनासमवेत
जातिमत्त्वस्य विवक्षितत्वात् अत्र सत्ताजातिमादायातिव्याप्तिवारणाय क्रियावद्वृत्ती
ति तादृशाद्रव्यत्वादिजातिमादाय गगनादावतिव्याप्तिवारणाय गगनासमवेतेति क्रि
यावत्त्वं तद्वृत्तित्वं तादृशजातिमत्त्वं समवायेन बोध्यम् नातः संबंधांतरेण तद्वत्त्वं त
द्वृत्तित्वादिकमादाय दोषः इदमुपलक्षणम् क्रियानिरूपितसमवायिकारणतावच्छेद णम
त

जकधर्मवत्वस्य विवक्षणीयतया तादृशधर्मवत्त्वस्याभावे च द्रव्यपदमुपात्तम् पदास
र्वपदसमभिव्याहृतमूर्तशब्देन किंयाच्चावच्छिन्नविशिष्टं मूर्तत्वजात्यवच्छिन्नं वाल
ग भ्यते संयोगीशब्देनाभिन्नयोरेव संयोगित्वमान्नभेदोल्लभ्यते द्रव्यपदसमभिव्याहारात्त
तादृशभेदसमानाधिकरणद्रव्यविभाजकधर्मवत्त्वं किंयाच्चावच्छिन्नासमानाधिक
त्व रणतादृशधर्मवत्त्वं मूर्तत्वसमानाधिकरणतादृशधर्मवत्त्वेवानीदृशं लक्षणं ल
भ्यते इति न कोपि दोषः अत्रैव दीधितिकाकारस्यापि निर्भर इति प्रतिभाति प्रसंगसंग
त्या अत्रैव मूर्तस्यापि लक्षणमाह मूर्तत्वमिति परिच्छिन्नपरिमाणवत्त्वमिति
अत्र परिमाणे परिच्छिन्नत्वं नाम नापकर्षाश्रयत्वं परमाणुपरिमाणस्यकुतोप्यप

णाधिकरणकालवृत्तित्वं तत्प्रतियोगित्वं वर्त्तमानत्वं तादृशकालवृत्तित्वं भविष्यत्वं
च तादृशकालवृत्तिप्रागभावप्रतियोगित्वमिति बोध्यम् अतीतेति भावप्रधानाति
र्देशः व्यवहारः ज्ञानजनकशब्दः अतीतादिपदोत्तरलुप्तषष्ठ्याः कारणत्वमर्थः तस्य प्र
त्युत्पत्तिवैचित्र्यात व्यवहारपदार्थैकदेशज्ञानेऽन्वयः तत्र कारणं तन्निरूपितकारण
तावच्छेदकघटकमित्यर्थः कारणत्वस्य कारणतावच्छेदकघटकपदत्वात एवं
च तादृशव्यवहारं प्रत्यतीतत्वादेर्ज्ञानस्य वान्वयव्यतिरेकाभ्यां हेतुत्वावश्यकतया
वाच्यतासंबंधावच्छिन्नातीतादिशब्दनिष्ठकार्य्यतानिरूपितस्वरूपसंबंधावच्छिन्ना
तीतत्वादिनिष्ठकारणतावच्छेदकघटकतया तादृशकार्य्यतानिरूपितविशेष्यता
संबंधावच्छिन्नातीतत्वादिप्रकारकज्ञाननिष्ठकारणतानिरूपितविषयतासं

कतया सिद्धजातिविशेषसहरूपं मूर्तत्वं तादृशजातिः उत्पन्नविनष्टघटादावपि त्वी क्षिप
ते नापकाभावादित्यादि बोध्यं विभुनित्यं चेति मूले न यतो विभु अत एव नित्यमित्यभि
ति प्रायं प्रकाशयति विभुत्वादेवेति विभुत्वलिंगादेवेत्यर्थः आत्मवन्नित्यत्वमाहेति तथाचा
काशं नित्यं विभुत्वादात्मवदित्यनुमानादाकाशस्य नित्यत्वसिद्धिर्भवति इत्याशयेना
हेति कालितार्थः इदमुपलक्षणं शब्दोऽप्यसमवेतः गुणत्वात् रूपवदित्यनुमानात्
स्तमिऽप्यसमवेतत्वबाधसहकृतानात् सिद्धदाकाशे लाघवज्ञानसहकारात् यथा एक
त्वेन सिध्यति तथा नित्यत्वेन लाघवमिति लाघवज्ञानसहकारात् नित्यत्वेनापि सिध्यती
त्यपि बोध्यं कालं लक्षयतीति क्रमप्राप्तमित्यादिः आदौ प्रमाणानंतरं लक्षयतीत्यर्थः
मूले ऽतीतादीति आदिना वर्तमानत्व भविष्यत्वयोः परिग्रहः अजातीतत्वे शब्दप्रयो

द्रवत्वे प्रमाणाभावात् अन्यथा शरीरे सुखमिति प्रतीतिप्रसङ्गात् शरीरे समवायेन सुखस्वीकाराप
त्तिः अत्रादृष्टविशेषविशिष्टकर्णशष्कुल्यवच्छिन्नं सदाकाशमेव श्रोत्रेन्द्रियम् अतः सर्वेषां कर्णशष्कु
लिमत्वेऽपि अदृष्टविशेषविशिष्टत्वाभावात् केषांचिन्न बाधिर्यमिति बोध्यं तच्चैकमिति मूलप्र
तिपाद्याकाशैकत्वं तन्मूलं प्रवर्तयति आकाशमपीति अपिशब्दो नानात्वेन सिद्धपृथिव्या
दिविशिष्टचतुष्टयसमुच्चायकः उक्तार्थमेव विवृणोति किं पृथिव्यादिवन्नानेति प्रश्नार्थ
कः किंशब्दः नानेत्युत्तरं योज्यः इति जिज्ञासायामिति शेषः तथा च पृथिव्यादिचतुष्टयस्य नाना
त्वसाधकं यथा प्रमाणं तथा आकाशस्यापि नानात्वसाधकप्रमाणमस्तीति जिज्ञासायामिति
फलितार्थः नेत्याहेति तादृशप्रमाणं नास्तीत्याहेत्यर्थः मूले तच्चैकमिति तदेकमेवेत्यर्थः
यथाश्रुते अनेकत्वाश्रयघटादेरपि प्रत्येकमेकत्ववत्त्वादव्यावर्तकत्वापत्तेः लाघवा

ध इत्यस्मद्गुरुचरणाः आकाशं लक्षयतीति क्रमसमाप्तमित्यादिः मूले शब्दगुणकमिति अ
त्र शब्दवत्त्वं लक्षणं लक्षणतावच्छेदकं शब्दत्वजातिः तद्व्याप्यतारत्वादिजातिश्च लक्षण
तावच्छेदकभेदाल्लक्षणानामनेकत्वेपि क्षतिविरहात् शब्दे गुणत्वोत्कीर्तनं गुणत्व
हेतुना शब्दे द्रव्याश्रितत्वसाधने इतरबाधसहकारेणाकाशरूपधर्मिसिद्धिरित्येतादृशा
र्थस्फोरणाय तात्त्विकप्रकारस्त्वस्मत्कृतमुक्तावलीप्रभायामनुसंधेयः नव्यास्तु आ
काशस्य विशेषगुणान्तरव्यवच्छेदाय गुणत्वकथनमित्याहुः समवायसंबंधेन श
ब्दस्याकाशलक्षणत्वलाभाय तस्य गुणत्वकथनमित्यस्मद्गुरुचरणाः नच वीणायां
ध्वनिः वने कोलाहल इत्यादि प्रामाणिकप्रतीतिव्यवहारात् शब्दवत्त्वं वीणादाव
तिव्याप्तमिति वाच्यम् वीणादेरवच्छेदकत्वावगाहित्वेनैव तदुपपत्तौ समवायेन श

न   प न

सैव लुप्ता: इंदुरिंदुरिव श्रीमान् रामोऽनन्वयः १ एकस्यैव स्तनउपमानोपमेयत्ववर्णनमनन्वयः उपमानमपि स्वस्य
न स्वेन साधर्म्यं नान्वेति कुत्रचित् अनन्वयिनोपि यस्य धर्मा यत्र नेतरसांतरव्यवच्छेदेनानुमेयत्वं न्नानाय इंदुरिंदुरिव
श्रीमानित्यत्र श्रीमत्वेन इंदुस्वनाम्न: सदृशो हि इति सदृशांतरव्यवच्छेदेन लभ्यते न तत्स्वेनापि सादृश्यसंभवात्
नुपमेयत्वेयपर्यवसानं यथा गगनं गगनाकारं सागरः सागरोपमः रामरावणयोर्युद्धं रामरावणयोरिव ए
वोदाहरणे श्रीमत्वस्य धर्मस्योपादानं नास्ति इह तु गगनादिवैपुल्यादेर्धर्मस्यनाप्तीति विशेषः पर्यायेण द्वयो
रुपमेयोपमानत्वे धर्मैक्ये उपमेयोपमा धर्मैक्यवत्त्वपि द्वयोः पर्यायेण उपमेयोपमानत्वे उपमेयत्ववत्त्वं तृतीयसाद
श्यव्यवच्छेदार्थं धर्मार्थे याद्विशेषः द्वितीयेन द्वितीयसादृश्ये वर्णिते तत्सादृश्येन सादृश्यमर्थसिद्धमपि सुरसत्वोपमानं तृतीय पत्र
सादृश्यव्यवच्छेदार्थं फलति यथा खमिव जलं जलमिव खं हंस इव चंद्र चंद्र इव हंसः कुमुदाकारास्तारास्ताराकारा
णि कुमुदानि पर्वचर्वणी इति धर्मैकधर्माद्यनिमित्तत्वादि धर्मैक्येनापमायामुपमायां भेदः उदाहरणद्वयेपि पूर्वनपोरे वो
पमानोपमेयत्वं त्यनम् यत्रिधर्मार्थं समवृत्तः शरदि गगनसलिलादिनैर्मल्यस्य वर्णनीयत्वात् पूर्वत्रापूर्वत्रपोरन्ययोपमासं

वत्वादिति भावः यदवच्छेदेन यत्संबंधाभावः इति यत्संबंधावच्छिन्नयन्निष्ठप्रतियोगिताका
भावीयवच्छेदकोपरत्यर्थः यथा श्रुते कपिसंयोगससमवायेनाप्यवृत्तित्वेपि समवायस्याव्या
प्यवृत्तितया तदभावस्यापि व्याप्यवृत्तित्वेनावच्छेदकाप्रसिद्ध्याऽसंगत्यापत्तेः तदवच्छेदे
नतत्संबंधत्वानस्येति तदवच्छिन्नविशेष्यतानिरूपिततत्संबंधावच्छिन्नतन्निष्ठप्रकारता
शालिज्ञानस्येत्यर्थः तत्संबंधावच्छिन्नतन्निष्ठप्रतियोगिताकाभावावच्छेदकावच्छिन्नवि
शेष्यतानिरूपिततत्संबंधावच्छिन्नप्रकारताशालिज्ञानस्येति समुदितार्थः विवादितत्वा
दिति तदभाववतीत्यादिवाक्याधीनत्वेन स्वीकृतत्वादित्यर्थः तथा च वृत्त्यादिकापि संयो
गीति प्रमीय विशेष्यतायाः कपिसंयोगाभावनिरूपितविरोधभंजकताश्रयमूलावच्छे
घत्वाभावेन निरुक्तलक्षणाभावात् न तादृशप्रमाति व्याप्तिरिति भावः आदौ मूला
वच्छिन्नो वृक्षः कपिसंयोगीत्यादिभ्रमेलक्षणानुपपत्याघानंतरं द्वितीयप्रमायामतिव्या प्ति

नांत्यः वृक्षे कपिसंयोगसत्त्वेन विशेष्यतायाः कपिसंयोगवदवृत्तित्वाभावात् न च तदभा

व वन्निष्ठत्वं तत्संबंधितावच्छेदकानवच्छिन्नत्वरूपं वाच्यं निरुक्तप्रमविशेष्यतायाः संयो

गसंबंधितावच्छेदकानवच्छिन्नत्वात् नाव्याप्तिरिति वाच्यं तथा सति घटः इत्याकारकनिर्ध

क र्मितावच्छेदकप्रमायामतिव्याप्त्यापत्तेः तादृशप्रमीयविशेष्यतायाः निरवच्छिन्नत्वेन घटत्व

संबंधितावच्छेदकानवच्छिन्नत्वादस्ततेरिति चेन्न तदभाववन्निष्ठत्वशब्देन तत्संबंधि

तानवच्छेदकावच्छिन्नत्वस्य विवक्षितत्वात् नोक्तप्रमायामतिव्याप्तिः निर्धर्मितावच्छे

दकप्रमाया प्रसिद्धा सर्वसामंजस्यं च अधिकं तु अस्मत्कृतमुक्तावलीप्रभायां प्रमालक्ष

णपरीक्षायां अनुसंधेयमिति दिक् यथास्तु तत्प्रम विशेषलक्षणस्य प्रमाविशेषेऽतिव्या

प्तिमाशंक्यानिरूकरोति नन्वित्यादि इदं संयोगीति प्रमायामिति वृक्षादिकं कपिसंयोगीति प्रमायामव्या

वाच्छिन्न वृक्षादिकं कपिसंयोगीति प्रमायां चेत्यर्थः आतिव्याप्तीति वृक्षादेरपि कपिसंयोगाभा

ष्टिं वा यदि संयोगाभावावच्छेदेनेति कपिसंयोगाभावनिरूपितविरोधभंजकताश्रयम्
लाद्यवच्छिन्नविशेष्यतानिरूपितकपिसंयोगनिष्ठप्रकारताशालिज्ञानस्येत्यर्थः ॥
ममत्वादिति निरुक्तप्रमालक्षणाक्रांतत्वादित्यर्थः नाव्याप्तिरिति शेषः संयोगावच्छेदेनेति
कपिसंयोगनिरूपितविरोधभंजकतावच्छेदकताश्रयावच्छेदेनेत्यर्थः संयोगसंबं
धस्याविद्यमानत्वात् इति वृक्षादौ समवायसंबंधेन कपिसंयोगसत्त्वादित्यर्थः एतत्प्र
दर्शनं च स्वप्रमाणप्रमायाः तत्संबंधितावच्छेदकावच्छिन्नविशेष्यतानिरूपिततान्लि
ष्ठप्रकारताघटित प्रमालक्षणाक्रांतत्वसंरक्षणायेति हृदयं नातिव्याप्तिरिति अत्रा
वच्छिन्नोद्धृतः कपिसंयोगीति प्रमायामित्यादिः अत्रादेः कपिसंयोगावच्छेदकत्वे
न तदभावावच्छेदकत्वाभावेन तदभावावच्छेदकाच्छेद्यत्वघटितप्रमालक्षणाक्रां
तत्वात् तत्तादृशप्रमायामतिव्याप्तिरिति भावः यद्यपीत्यनुभवं विना तेमूले यथा

न.प्र.
११८

त्वेन।

र्थानुभव इत्यादिना प्रत्यक्षत्वानुमितित्वोपमितित्वशाब्दत्वरूप प्रकारचतुष्टयान्यतम
विशिष्टः यथार्थानुभव इत्यर्थः अत्र प्रत्यक्षत्वं साक्षात्पदशक्यतावच्छेदकतयासिद्ध
जातिविशेषः एवमनुमित्यादिपदशक्यतावच्छेदकतयासिद्धजातिविशेषा अनुमिति
त्वोपमितित्वशाब्दत्वरूपधर्मा इति बोध्यम् अस्मत्कृतचरणास्तु साक्षात्करोम्यनुमि
मव नोमि उपमिनोमि शाब्दयामीति अनुगतसिद्धजातिविशेषाः प्रत्यक्षत्वादिधर्मा इतिव्या
चक्रुः अत्रैव प्रसंगसंगत्या प्रमाकरणमपि विभजते तत्करणमपीति प्रमाकरणम
पीत्यर्थः आपिना प्रमासमुच्चीयते तथा च यथा प्रमा चतुर्विधा तथा तत्करणमपि
चतुर्विधमिति लभ्यते अत्र प्रमाणनिष्ठकार्यतानिरूपितव्यापारसंबन्धावच्छिन्नका
रणत्वं तत्करणशब्दप्रतिपाद्यं प्रमाशब्दवाच्यस्य लक्षणं एवं चैतल्लक्षणलक्षि
तं प्रमाणशब्दवाच्यं चतुर्विधमिति फलितमिति बोध्यम् प्रसंगसंगत्या अत्रैव

न.प्र.

१२

ऽवश्यत्वात् पूर्ववृत्तितावच्छेदकधर्मेऽन्यथासिद्ध्यनिरूपकत्वस्यैव लाभाय तत्पदोपादा
नमिति कार्यनियतत्वे सति कार्यपूर्ववृत्तित्वमिति यथाश्रुतकारणलक्षणघटक
दलप्रयोजनमाह दीपिकायां पूर्ववृत्तीति रासभादावतिव्याप्तिरिति रासभादे घट
त्वावच्छिन्ननिरूपितपूर्ववृत्तिताश्रयत्वादिति भावः अतो नियतेति तथा च रासभा
दे घटत्वावच्छिन्ननिरूपितव्यापकत्वरूपनियतत्वानाश्रयत्वात् नातिव्याप्तिरिति भा
वः तावन्मात्रे कृते इति कार्यनियतत्वमात्रस्य कारणलक्षणत्वस्वीकारे इत्यर्थः
अतः पूर्ववृत्तीति तथा च तस्य पूर्ववृत्तित्वाभावान्नातिव्याप्तिरिति भावः तंतुरू
पमपीति अपिना तंतुसमुच्चयः तथा च पटं प्रति यथा तंतवः कारणं तथा तंतुरू
पमपि कारणं स्यात् पटं प्रति नियतपूर्ववृत्तित्वादिति भावः अनन्यथासिद्धत्वे
सतीति विशेषणादिति कारण[illegible]लक्षणस्थानन्यथासिद्धत्वघटितत्वस्वी

५३

राम

कारणसामान्यलक्षणमाह असाधारणकारणमिति व्यापारसंबंधावच्छिन्नकारणताव
त्कारणशब्दवाच्यमित्यर्थः कारणसामान्यलक्षणमाह कार्य्यनियतपूर्ववृत्तीति कार्या
व्यवहितप्राक्कालावच्छेदः कार्य्यतावच्छेदकसंबंधेन कार्य्याधिकरणनिरूपितदैशि
कविशेषणतासंबंधावच्छिन्नवृत्तित्वाश्रयो यः कारणतावच्छेदकसंबंधावच्छिन्नप्र
तियोगिताकोऽभावः तत्प्रतियोगितानवच्छेदकधर्मवदित्यर्थः तदप्रतियोगित्वमव
हापत तत्प्रतियोगितानवच्छेदकधर्मवत्त्वानिवेशात् नारपदंडादेः कारणत्वानुप
पत्तिः एतल्लक्षणघटकतत्तत्संबंधविशेषानिवेशप्रयोजनं स्वयमूह्यम् नचरा
सभादेरपि निरुक्तघटनियतपूर्ववृत्तितावच्छेदकऽन्यत्वादिमत्वादतिव्याप्तिरि
तिवाच्यम् अन्यथासिद्ध्यनिरूपितत्वेन विशेषणीयत्वात् नचैवंसति आनियतरा
सभादेरपि तादृशधर्मवत्त्वाभावादेवानातिप्रसंगो नियतपदमनर्थकमिति वाच्यम्

न.प्र.
१२१

मित्यर्थः यंप्रति पूर्ववर्तित्वमिति यत्कार्यनिरूपितनियतपूर्ववर्तित्वम[illegible]र्थः यद्घटिते तत्र य
त्यकृतकार्य्यनिरूपितसात्तात्त्वं यघटितान्वयव्यतिरेकशालिपरं एवं च तादृशान्वयव्यति
रेकशालिघटितधर्मावच्छिन्नतत्कार्य्यनिरूपितनियतपूर्ववर्तित्वाश्रयत्वं तत्कार्यनिरूपिता
न्यथासिद्धत्वमित्येकोर्थः यद्धर्मावच्छिन्नं यान्निष्ठं निरूपितनियतपूर्ववर्तित्वं यान्निष्ठयान्नि
रूपितनियतपूर्ववर्तितावच्छेदकोयोधर्म इत्यर्थः तथा च तत्कार्य्यनिरूपितनियतपूर्ववर्तिता
वच्छेदकत्वं तत्कार्य्यनिरूपितान्यथासिद्धत्वमित्यपरोर्थः प्रथमे द्वितीये च स्वतंत्रान्वयव्य
तिरेकशून्यत्वं विशेषणीयं तेन घटं प्रति कपालसंयोगस्य कपालघटितकपालसंयोगत्वा
वच्छिन्ननियतपूर्ववर्तितावच्छे[illegible]त्वेपि कपालस्य तादृशनियतपूर्ववर्तितावच्छेद
कताश्रयत्वेपि च कपालसंयोगस्य कपालस्य च नान्यथासिद्धत्वप्रसंगः यद्यप्यन्यथासि
द्धेस्त्रैविध्यं वक्तुमुचितं अर्थभेदात् तथापि प्रथमद्वितीययोरेकशब्देन प्रतिपादनसं

45

कारणादित्यर्थः तथा चानन्यथासिद्धत्वे सति नियतत्वे सति पूर्ववृत्तित्वं कार्य्यस्यावच्छि
तप्राक्कालावच्छेदे कार्य्याधिकरणवृत्त्यंताभावप्रतियोगितानवच्छेदकधर्मवत्त्व
मिति कारणलक्षणं फलितं अतो नारणपस्य दंडादेः कारणत्वानुपपत्तिः एवं च तंतु
रूपादेः पटं प्रत्यनन्यथासिद्धत्वेनानन्यथासिद्धत्वघटितलक्षणाभावान्नातिव्याप्तिरिति
भावः अत्रैव तादृशस्य कारणत्वरूपत्वे दंडस्य पृथिवीत्वेनापि हेतुतापत्तिः पृथिवीत्वा
देरपि तादृशधर्मरूपत्वात् निरुक्तधर्मेऽन्यथासिद्ध्यनिरूपकत्वविशेषणदाने दण्डगतान्यथा
सिद्धत्वविशेषणं व्यर्थमित्यरुचिरूपा अनन्यथासिद्धत्वघटितकारणलक्षणपरिष्कार
नंतरं अन्यथासिद्धिं विभजते स्वयमेव प्रसंगसंगतिमाह अनन्यथासिद्धत्वमिति अन्य
थासिद्धत्वाभावकूटवत्त्वमित्यर्थः अन्यथासिद्धिश्चात्रेति येति प्रतियोगिभूतान्यथासि
द्धिस्त्रिविधेत्यर्थः येनसहैवेति यद्विहितधर्मावच्छिन्नमेवेत्यर्थः यस्येति यन्निष्ठ

46

न.प्र.
१२२

व्याप्तिसिद्धिस्तत्र घटं प्रति शब्दं प्रति पूर्ववर्तित्व इत्यादि अप्रमाणाप॰ आकाशत्वज्ञानं विना आकाशं
घटपूर्ववर्तीति ज्ञानासंभवात् अनुभवबलात् आकाशत्वस्य घटपूर्ववर्तितावच्छेदकत्वसिद्धिः
आकाशत्वं च शब्दसमवायिकारणत्वं तच्च शब्दपूर्ववर्तित्वघटितमिति प्रकृतघटादिरूपका
र्य्यभिन्नशब्दपूर्ववर्तित्वघटितशब्दसमवायिकारणत्वरूपाकाशत्वावच्छिन्नघटादिरूपका
र्य्यनिरूपितनियतपूर्ववर्तिताश्रयरूपद्वितीयान्यथासिद्धाश्रयत्वं आकाशस्येति यद्याका
शत्वं शब्दाश्रयत्वादिरूपं तदा तेन रूपेणाकाशस्य च स्वप्रमाणांतरतीयमेव घटादिनिरूपितान्य
थासिद्धत्वं एवं घटं प्रति कुलालस्य कुलालपितृत्वेन द्वितीयान्यथासिद्धत्वमप्यूह्यमिति तृती
यान्यथासिद्धिमाह अन्यत्रेति प्रकृतकार्य्यसजातीयप्रकृतकार्य्यभिन्न इत्यर्थः निरूपितत्वं
ति ससम्यर्थः तस्य पदार्थैकदेशे पूर्ववर्त्तितायामन्वयः क्लृप्तनियतपूर्ववर्तित्वेनैवेति लघुध
र्मावच्छिन्ननियतपूर्ववर्तिताश्रयेणैवेत्यर्थः कार्य्यसंभव इति प्रकृतकार्य्यस्योत्पत्ति

47

राम

त्व
भवाच्छेदकमनुगतत्वत्रैविध्यमुक्तामिति ध्येयं अवगम्यत इति इदं च तंतुघटितं तंतुरूपस्य तंतु
त्वस्य च पूर्ववर्तितावच्छेदकत्वे प्रमाणोपन्यासाय न तु तस्यापि लक्षणघटकताव्यर्थत्वादिति
प्रथमं द्वितीयं चोदाहरति यथेति द्वितीयान्यथासिद्धिमाह अन्यं प्रतिपूर्ववर्तित्व इति प्रकृतका
र्य्यातिरिक्तकार्य्यनिरूपितनियतपूर्ववर्तित्व इत्यर्थः ज्ञात एवेति ज्ञानविषयत्वेनैवेत्यर्थः ता
दृशपूर्ववर्तित्वज्ञानानंतरमेवेति यावत् पश्यं प्रतीत्यादि यल्लिङ्गयान्निरूपितपूर्ववर्तित्वं
ज्ञानविषयतावदित्यर्थः तादृशपूर्ववर्तित्वज्ञानं भवतीति यावत् तथा चान्यपूर्ववर्तित्वज्ञा
नस्य प्रकृतकार्य्यपूर्ववर्तित्वज्ञानहेतुत्वलाभावात् तादृशकार्य्यकारणभावबलात् अ
न्यपूर्ववर्तित्वस्य प्रकृतपूर्ववर्तितावच्छेदकत्वासिद्धिः एवं च प्रकृतकार्य्यातिरिक्तकार्य्य
निरूपितनियतपूर्ववर्तित्वघटितधर्मावच्छिन्नप्रकृतकार्य्यनिरूपितनियतपूर्ववर्ति
ताश्रयत्वं प्रकृतकार्य्यनिरूपितान्यथासिद्धत्वमिति फलितमिति भावः एतादृशा

48

नशून्यत्वे सति नियतपूर्ववर्त्तित्वं नियतपूर्ववर्त्तितावच्छेदकधर्म्म हृतान्यथासिद्धिप्रतियोगिका
भावकूटवत्त्वे सति वा नियत त्वे सति पूर्ववर्तित्वं फलोपहितकारणत्वमिति निरुक्तान्यथासि
द्धिशून्यत्वे सति नियतपूर्ववर्तित्वं नियतपूर्ववर्तितावच्छेदकधर्मवत्त्वं स्वरूपयोग्यसाधारण
कारणत्वमिति वार्थः कार्य्यलक्षणं प्रतिमूले कार्य्यमिति कार्य्यपदवाच्यमित्यर्थः प्रागभाव
प्रतियोगीति प्रागभावप्रतियोगित्वं कार्य्यपदवाच्यसामान्यलक्षणमित्यर्थः इदमुपल
क्षणम् कार्य्यपदवाच्यस्यलक्ष्यत्वे स्ववृत्तिमहाकालभेदवत्त्वकालिकविशेषणत्वोभयसं
बंधेन सत्तावत्त्वरूपानुगतकार्य्यत्वं लक्षणम् भावकार्य्यशब्दप्रतिपाद्यमात्रस्य लक्ष्य
त्वे स्ववृत्तिमहाकालभेदवत्त्वकालिकविशेषणत्वसमवायैतात्र्यि तयसंबंधेन सत्ता
वत्त्वरूपानुगतकार्य्यत्वमेव लक्षणमित्याशयोऽयम् एतेन प्रागभावप्रतियोगित्वरूपकार्य्य
त्वस्याननुगतप्रागभावघटितत्वेनाननुगततया एकैकप्रागभावप्रतियोगित्वस्यान्यत्रावर्तमानत्वात्

49

राम

निर्वाह इत्यर्थः तत्तद्व्यक्तित्वमिति तद्भिन्नत्वमित्यर्थः तथा च प्रकृतकार्य्यसजातीयप्रकृतकार्य्य
भिन्नकार्य्यनिरूपितलघुधर्मावच्छिन्ननियतपूर्ववृत्तिताशून्यत्वं तत्कार्य्यजातीयनिरू
पितान्यथासिद्धत्वमिति फलितोर्थः उदाहरति यथेति पाकजस्थल इति विजातीयतेजःसं
योगात् युगपद्रूपादिचतुष्टयोत्पत्तिस्थले इत्यर्थः गंधं प्रतीति तत्तद्गंधसजातीयं प्रतीत्यर्थः
रूपप्रागभावस्येति अन्यथासिद्धत्वमिति शेषः अयं भावः पाकाद्रूपादिचतुष्टयोत्पत्त्यधि
करणे तदुत्पत्तेः प्राग्रूपादिप्रागभावचतुष्टयसत्त्वेपि यादृशपुष्पादौ कदाचिद्रूपांतरं नो
लब्धं किंतु गंधांतरमेव तत्र तादृशगंधोत्पत्त्यव्यवहितप्राक्काले रूपप्रागभावसत्त्वेमा
नाभावेन गंधप्रागभावस्येव क्लृप्तनियतपूर्ववृत्तिताकतया तेनैव प्रकृतकार्य्यस्याप्यु
त्पत्तिसंभवे प्रकृतगंधसजातीये रूपप्रागभावोन्यथासिद्ध इति एवं चेति अन्यथासिद्धस्य
त्रैविध्ये चेत्यर्थः अनन्यथासिद्धनियतपूर्ववृत्तित्वमिति निरुक्तान्यथासिद्धित्रयान्यत

न.प्र.

१२४

51

ति उत्पत्तिक्रियाविशेषणम् उत्पद्यत इति उत्पत्त्याश्रयत्वमित्यर्थः यन्निरूपितसमवायसंबंधा
वच्छिन्नोत्पत्त्याश्रयत्वमिति समुदितार्थः तथा च समवायसंबंधावच्छिन्नोत्पत्तिनिरूपकत्वं
निरूपकतासंबंधेन समवायसंबंधावच्छिन्नोत्पत्तिसामान्यवत्त्वं वा द्वितीयं समवायिकार
णत्वस्वरूपमिति फलितार्थः अन्तलक्षणं तु समवायिकारणशब्दाधीनबुद्धिनिरूपितप्रका
रत्वं प्रकारतासंबंधासंबंधेन तादृशबुद्धिमत्त्वं वा नातो न्यूनतेति हृदयम् तस्याश्रयमुदाहरति
तंतव इत्यादि असमवायिकारणत्वस्वरूपमाह कार्येणेति कारणमिति कारणत्वमि
त्यर्थः असमवायिकारणमिति असमवायिकारणत्वमित्यर्थः तथा च समवायेन का
र्याधिकरणनिरूपितसमवायसंबंधावच्छिन्नवृत्तित्वतादृशाधिकरणनिरूपितस
मवायघटितसामानाधिकरण्यसंबंधावच्छिन्नवृत्तित्वान्यतरवत्वे सति कारणत्वमस
मवायिकारणत्वमित्यर्थः समवायसंबंधावच्छिन्नकार्यतानिरूपितसमवायसंबंधा

राम

अव्याप्तिरिति दूषणस्यनावकाशः अनुगतलक्षणसत्त्वादिति कारणत्वं विभजते कारणमिति
कारणत्वमित्यर्थः भावप्रधाननिर्देशादिति भावः अत्र कारणतात्वं कारणत्वसामान्यलक्ष
णं कारणतात्वंच कारणत्वमित्याकारकप्रकारिविबुद्धिप्रकारत्वं नातोन्यूनतेति कारणस्यत्रै
विध्याभावेन विभागानुपपत्तेः यथाश्रुतासंगतिरितिध्येयम् त्रिविधमिति प्रकारत्रयान्यत
तथाच ५ मविशिष्टमित्यर्थः समवाय्यसमवायिनिमित्तभेदात् इति समवायिकारणत्वासमवायि
कारणत्वनिमित्तकारणत्वभेदादित्यर्थः समवायिकारणत्वादित्रितयनिष्ठभेदप्रयोज्यप्रका
रत्रयान्यतमविशिष्टकारणत्वमिति समुदितवाक्यार्थः समवायिकारणस्वरूपमाह यत्सम
वेतमिति समवेतंकार्य्यं यत्समवेतमुत्पद्यत इतियोजना यन्निरूपितसमवायसंबंधावच्छि
न्नमित्यर्थः कार्य्यमिति कार्य्यत्वमित्यर्थः तथाच समवायसंबंधावच्छिन्नकार्य्यतानिरूपि
ततादात्म्यसंबंधावच्छिन्नकारणत्वं यस्य समवायिकारणत्वस्वरूपमित्यर्थः यत्समवेतमि

न·प्र·

२२५

ज्ञान

ति अत्र निमित्तकारणं शब्दजन्यज्ञानाधीनप्रकारत्वं प्रकारतासंबंधेन तादृशत्वं वा निमित्तकारण
त्वसामान्यलक्षणं तेनन्यूनतेतिरिक्तद्वयम् कारणत्वस्वरूपमुक्त्वा तद्विशेषणत्वस्वरूपमुपसंहरति
तद्देशादिति तल्लक्षणलादित मनुपदं निरुक्तं पात्रिविधं कारणत्वं तन्मध्ये इत्यर्थः घटकत्वं तत्सम्य
र्थः तत्पासाधारणकारणत्वेऽन्वयः तथा च निरुक्तकारणत्रयघटकासाधारणकारणत्वेनक
रणत्वमित्यर्थः असाधारणत्वं च व्यापारसंबंधावच्छिन्नत्वं तथा च व्यापारसंबंधावच्छिन्नकारण
त्वं कारणत्वस्वरूपमिति भावः अत्रकारणशब्दाधीनबुद्धिनिरूपितप्रकारत्वं प्रकारतासंबं
धेन तादृशबुद्धिम~~[illegible]~~ त्वं वा कारणत्वसामान्यलक्षणं अतोनन्यूनते
ति ध्येयम् प्रत्यक्षप्रमाणलक्षणमाह तत्रेति प्रमाणचतुष्टये इत्यर्थः घटकत्वं सप्तम्यर्थः तस्य
प्रत्यक्षमिति प्रथमांतपदार्थस्याप्यप्रत्यक्षेऽन्वयः प्रत्यक्षज्ञानकारणमिति प्रत्यक्षात्मकज्ञा
ननिरूपितव्यापारसंबंधावच्छिन्नकारणतावदित्यर्थः प्रत्यक्षशब्दस्य प्रमाणे प्रमितौ च प्रयोगात

ण

53

राम

54

वाच्छिन्नकारणत्वतादृशकार्यतानिरूपितसमवायघटितसामानाधिकरण्यसंबंधावच्छि
न्नकारणत्वान्यतरदसमवायिकारणत्वंस्वरूपमितिफलितोर्थः तेनसमवायेनपटीयरूपा
दिकारणे पटे पटस्यसमवायघटितसामानाधिकरण्यसंबंधेनवर्तमानत्वात् पटरूपंप्रति
पटस्यासमवायिकारणत्वंदुर्वारमितिशंकानिरस्ता आद्यकेत्वन्यत्रानुसंधेयम् द्विविधा
समवायिकारणत्वाश्रयमुदाहरति यथातंतुसंयोगइत्यादि अत्रासमवायिकारणत्वल
क्षणं असमवायिकारणशब्दाधीनज्ञानीयप्रकारत्वं प्रकारतासंबंधेनतादृशज्ञानवत्वं
वानाम्नतेति बोध्यम् निमित्तकारणत्वस्वरूपमाह तदुभयभिन्नं भिन्नमिति समवा
यिकारणत्वभेदासमवायिकारणत्वभेदोभयविशिष्टकारणत्वमित्यर्थः तेनसमवा
यिकारणत्वादावतिप्रसक्तेः निरुक्तकारणत्वघटितसत्वेपि नक्षतिः निमित्तकारणमिति नि
मित्तकारणत्वस्वरूपमित्यर्थः निरुक्तकारणत्वाश्रयमुदाहरति यथातुरीवेमादिकमिति

मेरर

र्थत्वमेव लक्षणं नानुपदमप्येतादृशस्य लक्षणत्वलाभायैव संनिकर्षांशे निरुक्तकार्यत्ववि
रहेणोक्तातिव्याप्त्यप्रसक्तेः अनुमित्यादौ निरुक्तकार्यत्वाभावादेवानतिप्रसक्तेः जनकतायां निरु
क्तसंबंधावच्छिन्नत्वमपि न देशनीयम् एवं च न कोऽपि दोषः लाघवं चेति प्रतिभाति यद्यपि सा
क्षात्कारोऽमीत्यनुव्यवसायसिद्धा प्रत्यक्षत्वपदशक्यतावच्छेदकतया सिद्धा वा प्रत्यक्षजातिरे
व प्रत्यक्षज्ञानलक्षणमुचितं लाघवान्नीरूपत्वाच्च न तु निरुक्तलक्षणं गुरुत्वान्नेश्वरप्रत्यक्षेऽ
व्याप्तत्वाच्च न चापीन्द्रियार्थसन्निकर्षोत्पन्नमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं ज्ञानं
प्रत्यक्षमिति गौतमसूत्रानुरोधेन जन्यप्रत्यक्षस्य लक्ष्यत्वमंगीकृत्य गुरुभूतमप्येतल्ल
क्षणमेवोक्तमिति ध्येयं प्रत्यक्षज्ञानं विभजते तद्द्विविधमिति निरुक्तलक्षणाक्रान्तप्र
त्यक्षज्ञानमित्यर्थः अत्र प्रत्यक्षमेव द्विविधं अनुमित्यादेः सर्वस्यापि सविकल्पकैतिच्चेन्न
व्याप्तिवारणाय विशेषणदलं घटादावतिव्याप्तिवारणाय विशेष्यभागः इदमुपलक्षणं

राम

लक्षणवाक्यघटकप्रत्यक्षपदं प्रत्यक्षप्रमितिपरं न तु प्रमाणपरं इति स्फुटीकरणेन ज्ञानपदम्
न तु प्रत्यक्षज्ञानत्वेनापि लक्षणे प्रवेशः ज्ञानत्वांशस्य व्यर्थत्वात् न चैतल्लक्षणघटकैः वाक्यघ
टकप्रत्यक्षपदस्य प्रमाणप्रमितिसाधारणप्रत्यक्षसामान्यपरत्वे ज्ञातिविरहात् प्रमितिः विशे
षणपरत्वस्फुटीकरणफलतया ज्ञानपदसमर्थनमयुक्तमिति वाच्यम् तथा सति चक्षुरादि
न निरूपितकारणताश्रयेऽतिव्याप्त्यापत्तेरिति हृदयं प्रत्यक्षज्ञानलक्षणमाह इंद्रियेति इंद्रियार्थ
योः सन्निकर्षः संयोगादिः तज्जन्यत्वे सति ज्ञानत्वमित्यर्थः न च कालविधया चक्षुः संयोगादि
जन्यत्वमादाय धानुमित्यादावतिव्याप्तिरिति वाच्यम् कार्य्यतायां स्वव्यापारताप्रयोजकसंबंधा
नवच्छिन्नत्वनिवेशेनोक्तदोषाभावात् संनिकर्षध्वंसेऽतिव्याप्तिवारणाय ज्ञानत्वनिवेशः अ
त्रेंद्रियार्थसंनिकर्षजन्यत्वं तादृशसन्निकर्षनिष्ठसन्निकर्षविभाजकोपाध्यवच्छिन्नका
रणतानिरूपितकार्य्यत्वं एवं च सन्निकर्षविभाजकोपाध्यवच्छिन्नकारणतानिरूपितका

जातित्वानुपपत्तेः तस्मान्निर्विकल्पकत्वस्य जातित्वेन किमपि बाधकमिति प्रतिभाति एतेन प्र
कारत्वानिरूपकत्वविशिष्टज्ञानत्वस्य लक्षणत्वे ज्ञानत्वविशिष्टप्रकारत्वानिरूपकत्वमादा
य विनिगमनाविरहः प्रकारत्वानिरूपकत्वज्ञानत्वोभयत्वावच्छिन्नस्य लक्षणत्वे लक्षणता
वच्छेदकसंबंधाप्रसिद्धिरिति दूषणस्यानवकाशः निष्प्रकारकशब्दार्थमाह दीपिकायां विशे
षणेत्यादि अत्र विशेषणविशेष्ययोः संबंधः इति विग्रहः विशेषणविशेष्यत्वस्य वैयर्थ्या
पत्तेः किंतु विशेषणं च विशेष्यं च संबंधश्च विशेषणविशेष्यसंबंधास्तानवगाहते इति
व्युत्पत्त्या विशेषणानवगाहिज्ञानं विशेष्यानवगाहिज्ञानं संसर्गानवगाहिज्ञानं च नि
र्विकल्पकस्वरूपं तादृशज्ञानत्वं लक्षणमिति लभ्यत इति भावः इत्यर्थ इति निष्प्रका
रकशब्दतात्पर्यार्थ इत्यर्थः न च निर्विकल्पकस्यापि घटघटत्वसमवायविषयकत्वा
दसंभव इति वाच्यम् विशेषणत्वेनावगाहित्वस्य विशेषणत्वाद्यनिरूपकत्वार्थक

सांसर्गिकविषयतानिरूपकत्वघटितं विशेष्यत्वानिरूपकत्वघटितं च लक्षणं नमेऽपि बो
ध्यं अस्मत्कृतचरणास्तु विलक्षणविषयताशालित्वमेव लघुभूतं निर्दुष्टं निर्विकल्पक
लक्षणमिति व्याचक्रुः वस्तुतः निर्विकल्पकपदस्य प्रत्यक्षविशेषयोगरूढत्वान्निर्वि
कल्पकपदशक्यतावच्छेदकतया सिद्धप्रत्यक्षत्वव्याप्यजातिविशेषरूपमेव निर्विकल्प
कत्वं न च सविकल्पकपदशक्यतावच्छेदकतया सिद्धसविकल्पकत्वजात्या निर्विकल्पकत्व
स्यांशिकनिर्विकल्पकात्मकसविकल्पकप्रत्यक्षे समावेशेन सांकर्यान्न तस्य जातित्व
संभवादिति वाच्यं सविकल्पकत्वस्य प्रत्यक्षत्वज्ञात्या सांकर्येण जातित्वासंभवात् स्वस
मानाधिकरणस्वाभाववत्समानाधिकरणस्वसमानाधिकरणोऽप्रतियोगित्वैतत्त्रितयसं
बंधेन जातिविशिष्टत्वस्यैव सांकर्यरूपतया निर्विकल्पकत्वस्य तादृशसविकल्पकत्वे
न सांकर्यस्यादोषत्वात् अन्यथा पृथिवीत्वादेरपि घटजलान्यतरत्वादिना सांकर्येण

भा

ष्टज्ञानत्वादिति प्रकारतानिरूपकत्वविशिष्टज्ञानत्वादित्यर्थः ज्ञानीयप्रकारतानिरूपकत्वा
दिति यावत् तेन नोक्तदोषः न चैवं ज्ञाने हेतुसत्वाद्व्यभिचार इति वाच्यं कालिकस्वरूपोभय
संबंधेन हेतुत्वस्वीकारात् नन्वसविकल्पकलक्षणमाह मूले सप्रकारकं ज्ञानमिति प्रका
रतानिरूपकत्वविशिष्टज्ञानत्वं ज्ञानीयप्रकारतानिरूपकत्वं वा सविकल्पकलक्षणमि
त्यर्थः इदमुपलक्षणं ज्ञानीयविशेष्यतानिरूपकत्वं ज्ञानीयसांसर्गिकविषयतानिरू
पकत्वं च तल्लक्षणमित्यपि बोध्यं सविकल्पकस्वरूपमाह यथेति डित्थोयमिति इदं
च नामप्रकारकज्ञानमात्रोपलक्षकं ब्राह्मणोयमिति इदं च जातिप्रकारकज्ञानमात्रो
पलक्षकं श्यामोयमिति इदं च गुणप्रकारकज्ञानमात्रोपलक्षकं इदमुपलक्षणम् अ
पं[illegible]भाव इत्याकारकोप्यधिरूपधर्मप्रकारकज्ञानस्वरूपं सविकल्पकमित्यपि बोध्यं स
प्रकारकज्ञानशब्दार्थमाह दीपिकायां नामजात्यादीति आदिना गुणपरिग्रहः अत्रापि ना

ना

तत्प्रयोजकदोषाभावात् निर्विकल्पके प्रमाणाभावात् अप्रत्यक्षत्वे विधमप्रामाणिकमित्याशंक्यपतिन
न्विति किं मानमिति तस्यातींद्रियतयाप्रत्यक्षप्रमाणासंभवादिति भावः गोरिति विशिष्टज्ञा
नामिति विशिष्टवैशिष्ट्यबोधानात्मकविशिष्टज्ञानमेवपक्ष इति स्फुटीकरणायपक्षीभूत
विशिष्टज्ञानस्य गोरित्याकारकत्वकथनं विशिष्टवैशिष्ट्यज्ञानस्यापि पक्षत्वे तस्य विशेषण
तावच्छेदकप्रकारकनिर्णयजन्यत्वेन विशेषणज्ञानजन्यत्वस्यापि सिद्धतया अंशतः सिद्धसा
धनापत्तेः न तु गोरित्याकारकत्वविशिष्टज्ञानत्वेन पक्षता गौरवात् प्रयोजनाभावाच्च किं
तु निरवच्छिन्नगोत्वप्रकारतानिरूपितनिरवच्छिन्नविशेष्यताशालिज्ञानत्वादिनेतिहृद
यं विशेषणज्ञानजन्यमिति अत्र विशेषणज्ञाननिष्ठसमवायसंबंधावच्छिन्नकारणता
निरूपितकार्यत्वं विशेषणज्ञाननिष्ठकारणतानिरूपितसमवायसंबंधावच्छिन्नका
वा र्यत्वं बोध्यं तेन कालिकसंबंधेन विशेषणज्ञानजन्यत्वसाधने सिद्धसाधनं विशि

60

णामिति बोध्यं षड्विधसन्निकर्षं दर्शयति संयोग इति संयुक्तसमवाय इति समवा[illegible]लक्षणोभयसंबंधेन
संयोगविशिष्टसमवाय इत्यर्थः तेन घटादौ चक्षुरादिसंयोगकालेपि कालांतरीण चक्षुरादिसंयो
गाश्रय घटादिसमवायस्य सर्वदा रूपादौ सत्वेपि न सर्वदा रूपादिचाक्षुषापत्तिः संयुक्तसमवेतसम
वाय इति स्वसमवायिसमवेतीयस्वरूप[illegible]संबंधेन संयोगविशिष्टसमवाय इत्यर्थः तेन नोक्त
रीत्या दोषः समवाय इति श्रोत्रावच्छिन्नसमवाय इत्यर्थः तेन दूरस्थ शब्दस्य न श्रावणप्रत्यक्षा
पत्तिः समवेतसमवाय इति श्रोत्रसमवेतसमवाय इत्यर्थः कर्णविवरावच्छेदेन शब्दसमवाय इ
तियावत् तेन नोक्तरीत्या दोषः विशेषणविशेष्यभावश्चेतीति विशेषणता चेतीत्यर्थः अत्रा
भावाधिकरणसंबंधस्य विशेष्यतेत्यपि संज्ञा वर्तते तथा च विशेषणता शब्द विशेष्यता शब्दयोः
पर्यायत्वमित्येकदेशिमतानुसारेण विशेषणविशेष्यभावश्चेत्युक्तमिति ध्येयम् इंद्रियसंब
द्ध विशेषणता चेतीतियावत् संयोगादिसन्निकर्षस्य लक्रमेण दर्शयति चक्षुषेति चक्षुष्य

रूप

मजात्यादिविशेषणविशेष्ययोः संबंधस्येति न विग्रहः उक्तदोषापत्तेः किंतु नामजात्यादिविशेषणंच विशेष्यंच
संबंधश्चावगाहत इति व्युत्पत्त्या नामजात्यादिँविशेषणावगाहिज्ञानं विशेषणावगाहिज्ञानं विशेष्यावगा
हिज्ञानं संबंधावगाहिज्ञानं सविकल्पकं तादृशज्ञानत्वं सविकल्पकलक्षणमिति लभ्यत इति अर्थइ
ति सप्रकारकं ज्ञानमिति वाक्यतात्पर्यार्थ इत्यर्थः न च निर्विकल्पकस्यापि तादृशत्वात् अतिव्या
प्तिरिति वाच्यम् विशेषणविशेष्यसंबंधावगाहित्वानत्वस्य विशेषणत्व विशेष्यत्वसांसर्गिकत्व
निरूपकत्वार्थकतया निर्विकल्पकस्य तादृशत्वेनोक्तदोषाँप्रसक्तेः सविकल्पकमुदाहरतीति स
विकल्पकस्वरूपमाहेत्यर्थः इंद्रियार्थसन्निकर्षं विभजते मूले प्रत्यक्षज्ञानहेतुरिति इदं च प्रत्यक्ष
ज्ञाननिरूपणानंतरं संनिकर्षनिरूपणे उपजीव्योपजीवकभावस्य संगतित्वलाभाय इंद्रियार्थसंनि
कर्ष इति इंद्रियार्थयोर्लौकिकसन्निकर्ष इत्यर्थः षाड्विध इति प्रकारः षट्कान्यतमविशिष्ट इत्यर्थः
तत्र लौकिकविषयताप्रयोजकत्वं संयोगादिविशेषणान्यतमत्वं वा लौकिकसन्निकर्षसामान्यलक्ष
यो

समवायस्य संनिकर्षविधया हेतुत्वं कालत्वावच्छेदकगौरवात्
यत्र संयुक्तसमवायस्य हेतुत्वसंभवः तत्र संयुक्तसमवेत २

त्वानुरोधेन संयोगस्य ज्ञानादिप्रत्यक्षत्वानुरोधेन संयुक्तसमवायस्य च सान्निकर्षत्वावश्यकतया लाघवा
नुरोधेन द्रव्यप्रत्यक्षमात्रे संयोगस्य द्रव्यसमवेतप्रत्यक्षमात्रे संयुक्तसमवायस्य च सान्निकर्षत्वमभि
~~समवेत २~~ तं सर्वं च यत्र संयोगसंभवः न तत्र संयुक्तसमवायस्य तथा हेतुत्वं युक्तमुक्तेः यत्र तूभयासंभवः तत्रैव सं
युक्तसमवेतसमवायस्य सान्निकर्षविधया हेतुत्वं लघुधर्मावच्छिन्नस्य हेतुत्वासंभवादित्याशयः
घटरूपप्रत्यक्षे इति घटपदं द्रव्यमात्रोपलक्षकं रूपपदं समवेतमात्रोपलक्षकं तथा च द्रव्यसमवेत
वृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षे इत्यर्थः फलितः संयुक्तसमवाय इति स्वसमवायिविशे
षणता~~विशेष~~संबंधेन द्विजातीयसंयोगविशिष्टसमवाय इत्यर्थः सान्निकर्ष इति सान्निकर्षवि
धया हेतुरित्यर्थः तदुपपादयति चक्षुःसंयुक्तेति इंद्रियसंयुक्तद्रव्यसमवायस्य द्रव्यसमवेतमात्रे
सत्वादिति फलितार्थः रूपत्वसामान्यप्रत्यक्षे इति द्रव्यसमवेतसमवेतप्रत्यक्षे इत्यर्थः द्रव्यसमवे
तसमवेतवृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षे इति यावत् संयुक्तसमवेतसमवाय इति स्वसम

दामिंद्रियमात्रोपलक्षकं घटप्रत्यक्षे जननीयमिति अत्र घटपदं द्रव्यमात्रोपलक्षकं एवं चेंद्रियकरण
कजननाश्रये द्रव्यप्रत्यक्ष इत्यर्थः यद्यपि प्रत्यक्षे इंद्रियकरणकजननाप्रसिद्ध्या जननेंद्रियकर
णकत्वविशेषणमव्यावर्तकं तथापि द्रव्येंद्रियसंयोगस्यैव सान्निकर्षत्वमिति स्फुटीकरण
य जनने तादृशविशेषणमिति ध्येयम् तथा च द्रव्यवृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षंप्र
ति समवायसंबंधेनेंद्रियसंयोगः कारणमिति भावः अत्रेंद्रियसंयोगस्थलेंद्रियसंयोगत्वेन हेतु
त्वं इंद्रियसंयोगत्वस्येंद्रियप्रतियोगिकत्वविशिष्टसंयोग रूपत्वं संयोगत्वविशिष्टेंद्रियप्रति
योगिकत्वरूपत्वं वेत्यत्र विनिगमनाविरहेण गुरुरूपेण कार्यकारणभावद्वयापत्तेः नापि तादृश
संयोगनिष्ठतद्व्यक्तित्वेन व्यभिचारात् किंतु तादृशसंयोगनिष्ठप्रत्यक्षजनकतावच्छेदकतयाति
रिक्तवैजात्यस्वीकारेणेति हृदयम् यद्यपि घटादिरूपद्रव्यस्य तत्समवेतानां च संयुक्तसमवेतस
मवायेनैव प्रत्यक्षसंभवात् संयोगस्य संयुक्तसमवायस्य च सान्निकर्षत्वमनुचितं तथापि आत्मप्रत्य

न·प्र·

१३१

षीयकर्णावच्छेदशब्दस्य तादात्म्यसंबंधेन हेतुत्वस्वीकारेणैवानतिप्रसंगाच्चोक्तदोषस्यापि वारणसंभवादिति
समवेतसमवायमुदाहरति शब्दत्वसाक्षात्कार इति शब्दसमवेतलौकिकविषयतासंबंधेन प्रत्यक्षं इत्य
र्थः समवेतसमवाय इति कर्णावच्छेदेऽपि समवेतसमवाय इत्यर्थः तदुपपादयति श्रोत्रसमवेते
ति शब्दसमवेते शब्दत्वादौ श्रोत्रसमवेतसमवायसत्त्वादिति फलितार्थः ननु भेर्याद्यवच्छेदेन
जायमानशब्दस्य कर्णावच्छेदत्वाभावात्कर्णाकाशसंयोगस्य शब्दासमवायिकारणत्वाभावेन त
दवच्छेदेन प्रथमशब्दोत्पत्त्यसंभवाच्च कर्णावच्छेदशब्दाप्रसिद्ध्या कथं शब्दं श्रावणमिति शब्दा
तींद्रियवादिनां मतं निरसितुं तन्मतमुपन्यस्यति दीपिकायां नान्वित्यादि दूरस्थशब्दस्येति कर्णभिन्न
देशावच्छेदशब्दस्येत्यर्थः कथं श्रोत्रसंबंध इति कथं श्रोत्रावच्छेदत्वमित्यर्थः तथा च कस्यापि श
ब्दस्य कर्णावच्छेदत्वाभावात् न शब्दस्य प्रत्यक्षत्वमिति भावः वीचीतरंगन्यायेनेति आद्यावीचीस्व
समीपदेशे तरंगांतरं जनयति तच्च तरंगं स्वसमीपदेशे तरंगांतरं जनयति एवं भेर्याद्याकाशसंयोग।

65

राम

वायि समवेतविशेषणतासंबंधेनाविजातीयसंयोगाविशिष्टसमवाय इत्यर्थः तदुपपादयति चक्षुःसंयुक्त
इति इंद्रियसंयुक्तद्रव्यसमवेतगुणकर्मसमवायस्य गुणत्वकर्मत्वादिरूपद्रव्यसमवेतसमवेतमात्रेस
त्वादिति फलितार्थः श्रोत्रेणेत्यादि श्रोत्रकरणकजननाश्रय शाब्दप्रत्यक्ष इत्यर्थः शब्दविषयश्रा
वण इति यावत् शब्दवृत्तिलौकिकविषयतासंबंधेन श्रावणप्रत्यक्ष इति फलितार्थः समवायः स
न्निकर्ष इति श्रोत्रावच्छिन्नसमवायः सन्निकर्षविधयाहेतुरित्यर्थः तदुपपदयति कर्णविवरेति
कर्णविशिष्टाकाशस्येत्यर्थः ननु शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायस्य हेतुत्वे एकस्य शब्दप्रत्य
क्षकाले सर्वेषामपि शब्दप्रत्यक्षापत्तिः निरुक्तसन्निकर्षसत्वादिति चेन्न शब्दनिष्ठलौकिक
विषयतासंबंधेन तत्पुरुषीयश्रावणं प्रति तत्पुरुषीयकर्णावच्छेद्यशब्दसमवायस्यैव सन्निकर्ष
विधयाहेतुत्वस्वीकारेण उक्तदोषाभावात् शब्दस्येव तत्समवायस्यापि कर्णावच्छेद्यत्वस्वीका
रात् अथवा केवलसमवाय एव सन्निकर्षः निरुक्तसंबंधेन तत्पुरुषीयश्रावणं प्रति तत्पुरु

भावान्न प्रत्यक्षत्वं अत एवाद्यशब्दोनीन्द्रिय इति सकलतान्त्रिकसिद्धान्तोपि संगच्छत इति ध्येयम् अन्त्यशब्दस्य
कार्णविच्छेदेनोत्पन्नत्वेपि हीनशक्तिमत्वान्नप्रत्यक्षत्वमित्यन्ये उपांत्यशब्दोपीत्यपरे मूले भावप्रत्य
क्ष इति अभावनिष्ठलौकिकविषयतासंबंधेन प्रत्यक्षे इत्यर्थः विशेषणविशेष्यभाव इति विशेषणते
त्यर्थः सन्निकर्ष इति सन्निकर्षविधया हेतुरित्यर्थः अभावप्रत्यक्ष इत्युपलक्षणं समवायप्रत्यक्षेपि वि
शेषणतैव सन्निकर्ष इत्यपि बोध्यम् अनुपलब्धेः प्रमाणां(?)तरत्वं निराचष्टे विशेषणतासन्निकर्षे
ण भावस्य प्रत्यक्षतामुपपादयति घटाभाववद्भूतलमित्यत्रेति इत्याकारकप्रत्यक्ष इत्यर्थः निरूपि
तत्वं सप्तम्यर्थः तस्य विशेषणत्वेऽन्वयः चक्षुःसंयुक्ते भूतल इति भूतले चक्षुःसंयुक्तत्वविशेषणं
अभावेऽपि सन्निकर्षरूपविशेषणता सन्निकर्षत्वप्रतिपादनाय अन्यथा तादृशप्रत्यक्षे केवल
भूतलांश एव घटाभावस्य विशेषणत्वेनासांगत्यापत्तेः तथा च निरुक्तविशेषणतासन्निकर्षव
शादेवाभावस्य प्रत्यक्षविषयत्वसंभवान्नानुपलब्धेः प्रमाणांतरत्वमिति भावः मूलन्तापीहा।।

णां

रांम

समवायिकारणकायशब्दोपि स्वसमीपदेशावच्छेदेन शब्दांतरं जनयति सशब्दः स्वसन्निहितदेशाव
च्छेदेन शब्दांतरं जनयतीति रीत्या कर्णविवरावच्छेदेनोत्पन्नशब्दो गृह्यत इति वीचीतरंगन्यायेन शब्दो
त्पत्तिक्रम इति भावः उक्तन्यायेन शब्दोत्पत्तिस्वीकारे कालविलंबापत्त्यस्वरसं हृदि निधायाह कदंबमुक
म लन्यायेनेति प्रपंचित उत्पन्नं कदंबमुकलं सर्वदिगवच्छेदेनैकदैवानेकमुकुलानि जनयति एवं भेर्या
काशसंयोगासमवायिकारणकायशब्दो सर्वदिगवच्छेदेनैकदैवानेकशब्दान्जनयति परंतु यद्दिगभि
मुखो वायुस्तद्दिगवच्छेदेनाधिकशब्दान्जनयतीति कदंबमुकलन्यायेन शब्दोत्पत्तिक्रम इति भावः
श्रोत्रदेशेजातस्येति कर्णावच्छेदेन जायमानशब्दस्येत्यर्थः श्रोत्रसंबंधादिति श्रोत्रावच्छिन्नसम
प वायसंनिकर्षस्यसत्त्वादित्यर्थः प्रत्यक्षत्वसंभव इति तथा च शब्दसामान्यस्यातींद्रियत्वमप्रामाणि
कमिति भावः अत्र भेरीसंनिहितपुरुषीयकर्णावच्छेदेन कसादीद्वितीयादिशब्दानामुत्पत्तिसंभवात् शब्दस
मवायिकारणशब्दमात्रस्य प्रत्यक्षत्वं भेर्याकाशसंयोगासमवायिकारणकायशब्दस्य कर्णावच्छेद्यत्वा
के

त.प्र.

१३३

69

महत्त्वावच्छिन्नोद्भूतरूपावच्छिन्नालोकसंयोगावच्छिन्नचक्षुःसंयोगसहकृतघटादिनिष्ठव्याप्यता
निरूपितव्यापकताश्रयेति वाऽर्थो लभ्यते आत्मादिकापाद्यापादकयोर्व्याप्यव्यापकभावेनैवत्वात् केवलघ
टादेर्व्याप्यत्वासंभवाच्चेतेनाभावप्रत्यक्षपूर्वकदाचित्तत्कोविरहेपि न क्षतिः प्रतियोगिसत्त्वविरोधीति
प्रतियोगीप्रतियोगिकानुपलब्धीत्यर्थः निरुक्तव्यापकताश्रयोपलंभस्याविशेष्यतासंबंधावच्छि
न्नप्रतियोगिताकत्वरूपयोग्यताविशिष्टाभावसहकृतेंद्रियेणैवेतिसमुदितार्थः अभावज्ञानो
त्पत्ताविति घटाभावादिनिष्ठलौकिकविषयताशालिप्रत्यक्षोत्पत्तिसंभवइत्यर्थः अनुपल
ब्धेरिति निरुक्तयोग्यताविशिष्टाभावरूपानुपलब्धेरित्यर्थः प्रमाणांतरत्वासंभवादिति प्र
मितिकरणत्वास्वीकारादित्यर्थः ननु विनिगमनाविरहादिंद्रियसहकृतनिरुक्तानुपलब्धे
त्व रेव प्रमितिकरणंमास्तामित्याशंकां विनिगमकप्रदर्शनेन परिहरति अधिकरणज्ञानार्थ
मिति भूतलादिप्रमितिकरणत्वेनोभयमतसिद्धेंद्रियस्यैवेत्यर्थः करणत्वोपपत्ताविति राम

याभावस्य विशेष्यतयापि प्रत्यक्षविषयत्वमुपपादयति। दीपिकायां भूतले घटो नास्तीत्यत्रेति आधेयता
संबंधेन भूतलप्रकारकघटाभावविशेष्यकप्रत्यक्ष इत्यर्थः। निरूपितत्वं सप्तम्यर्थः तस्य विशेष्यत्वे
न्वयः एतेनेति निरुक्तसन्निकर्षबलादभावस्य प्रत्यक्षविषयत्वेनेत्यर्थः अनुपलब्धेरिति योग्यानु
पलब्धेरित्यर्थः प्रमाणांतरत्वमिति प्रमितिकारणत्वमित्यर्थः नन्वनुपलब्धेः प्रमितिकारणत्वा
नंगीकारे भूतलादौ घटादिभ्रमकाले घटाभावादिचाक्षुषापत्तिः निरुक्तविशेषणतासन्निक
र्षसत्वादित्याशंकामभावप्रत्यक्षे योग्यानुपलब्धेः सहकारिकारणत्वं स्वीकृत्य परिहरति यद्य
त्रेति भूतले यदि घटः स्यादित्यर्थः तदा भूतलमिवेति तदा भूतलप्रत्यक्षमिव घटप्रत्यक्षमपि
स्यादित्यर्थः दर्शनाभावादिति आपत्तिविषयघटप्रत्यक्षस्याविशेष्यतासंबंधावच्छिन्नप्रतियो
गिताकाभावरूपकारणसहकृतेंद्रियादित्यर्थः नास्तीति घटो नास्तीत्याकारकेत्यर्थः एतस्याभा
वज्ञानोत्पत्तावित्यग्रिमेणान्वयः उक्तार्थमेव विवृणोति तर्कितेति प्रतियोग्यारोपजन्यारोपविषयेति

कार्यत्व इति महदारंभकत्वहेतुनेत्यादिः सावयवत्वेनुमिते सतीत्यर्थः अनवस्थाप्रसंगादि
ति अप्रामाणिकावयवधाराकल्पनापत्तेरित्यर्थः तथा च परममहदिति व्यवहारान्यथानु
पपत्त्या प्रमाणांतरेणागमनादेः परममहत्त्वांगीकारे तत्प्रामाण्यमिति व्यवहारान्यथानु
पपत्त्या निरुक्तानुमाने न प्रामाण्यमित्यत्र पवत्तु सिद्धावपि महदारंभकावयवत्वहेतुनाप
प्रमाणतोः सावयवत्वसिद्धिः निरुक्तान्यथानुपपत्त्यादिरूपानुकूलतर्काभावेनाप्रामाणिका
नंतावयवकल्पनासंपादकत्वेन व्याप्यानुमानस्याप्रयोजकशंकाग्रस्तत्वादिति भावः ननु
ईश्वरचिकीर्षाधीनपरमाणुक्रियया सृष्टिः ईश्वरसंजिहीर्षाधीनपरमाणुक्रियया प्रलय
इत्यनुपपन्नं सृष्टिप्रमाणाभावादित्याशंकां प्रमाणप्रदर्शनेन परिहरति सृष्टिप्रलयस
द्भाव इति एतस्य श्रुतिरेव प्रमाणमित्युत्तरेणान्वयः सृष्टौ प्रलये चेत्यर्थः धाता यथापू

दीका

दीमकल्पयदि।त्यादिना यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंती त्या
दिश्रुतिपरिग्रहः इदानीं शिष्यबुद्धिवैशद्याय प्रलयस्य द्वैविध्यं तयोर्लक्षणं चाह सर्वकार्य्यद्र
व्यध्वंस इति कार्य्यद्रव्यप्रतियोगिकयावंतो ध्वंसास्तत्समुदाय इत्यर्थः अत्र द्रव्ये कार्य्यत्वनि
वेशनमनर्थकं नित्यप्रतियोगिकध्वंसाप्रसिद्धेः किंतु कार्य्यद्रव्याणामेव ध्वंसाः प्रसिद्धा
इति स्फुटप्रतिपत्त्यर्थं द्रव्ये कार्य्यत्वनिवेशः एवं पर्य्याप्तिसंबंधेन द्रव्यप्रतियोगिकध्वंसस
मुदायत्वं अवांतरप्रलयलक्षणमिति हृदयम् सर्वभावकार्य्यध्वंस इति भावकार्य्यया
वंतो ध्वंसाः तावत्समुदाय इत्यर्थः अत्रापि भावे कार्य्यत्वनिवेशनस्याव्यावर्तकतया पर्य्या
प्त्याख्यसंबंधेन भावप्रतियोगिकध्वंससमुदायत्वं महाप्रलयलक्षणमिति पर्य्यवसित
मिति बोध्यम् अत्रं यथापूर्वमकल्पयदिति श्रुतिविरोधापत्त्या महाप्रलयो नांगीकर्त
धाता

न। त्र्यणुकपोजीलसूर्यमरीच्यवच्छेदेनोपलभ्यमानत्वेप्रमाणाभावात् वापुत्र्यणुकस्या
तींद्रियत्वाच्च त्रयाणां जलादित्र्यणुकानां प्रत्यक्षप्रमाणासिद्धत्वाभावात् पक्षासिद्ध्यभावे
न तत्र त्र्यसरेणव्याप्यप्रवृत्तया तादृशत्र्यणुकानां सावयवत्वे प्रमाणाभाव इति दूषणमपास्तं
तत्त्र्यणुकत्वावच्छिन्नं सावयवमिति अवयवसमवेतमित्यर्थः चाक्षुषद्रव्यत्वादिति
द्रव्यवृत्ति लौकिकविषयता संबंधेन चाक्षुषवत्वादित्यर्थः घटवदिति अनुमानात्
त्र्यणुकसिद्धाविति शेषः अणुकावयवोपीति अणुकावयवत्वेन सिद्धः द्व्यणुकोपीत्य
र्थः अपिशब्दः उक्तसमुच्चायकः अत्र पक्षतावच्छेदकं च द्व्यणुकत्वं तच्च अणुकसम
वायिकारणतावच्छेदकतया सिद्धपार्थिवीत्वादिव्याप्यजातिचतुष्टयान्यतमात्मकं अ
तो न सांकर्य्यावकाशः एवं च तादृशान्यतमावच्छिन्नः पक्ष इति ध्येयम् सावयव इति

न्या॰प्र॰
६१

अवयवसमवेत इति समवेत इत्यर्थः महदारंभकत्वादिति महान्निरूपितसमवायिकारणत्वा
दिति महान्निष्ठसमवायसंबंधावच्छिन्नाधेयतानिरूपिताधिकारणतावत्वादित्यर्थः कपाल
वदित्यनुमानादिति त्र्यणुकावयवाः सिद्धा इति शेषः सोऽवयव इति त्र्यणुकावयव
त्वेनासिद्धोऽप इत्यर्थः स एव परमाणुरिति स एव परमाणुशब्दवाच्य इत्यर्थः अत्र परमाणुत्व
मपि पार्थिवीत्वादिव्याप्यनाना जातिः तादृशत्र्यणुकसमवायिकारणतावच्छेदकतयासि
द्धा न चैवं सति द्रव्यत्वव्याप्यनानाजातेर्न परमाणुवृत्तित्वमिति नियमभंग इति वाच्यम् तादृशनि
यमे मानाभावात् त्र्यणुकादिसाधारणतादृशजातेः परमाणुवृत्तित्वस्य नियमार्थका घादे
षाप्रसक्तेरिति ध्येयम् स च नित्य इति परमाणुर्नित्य एवेति ध्येयम् नित्यशब्दोत्तरयोजित
चशब्दस्यावधारणार्थकत्वान्न स्यानित्यत्वे बाधकमानं तस्यापीति परमाणोरपीत्यर्थः

व्याप्य

74

राम
६१

दृष्टत्वादंसमवेतद्रव्यत्वादेव तस्यानित्यत्वस्वीकियते महत्त्वोद्भूतरूपवत्वात्च घटादेरिव प्र
त्यक्षत्वं नचैवं सति अणुः परमाणुरिति प्रामाणिकव्यवहारानुपपत्तिः सर्वस्यैव महत्त्व व
त्वेनाणुत्वाश्रयाभावादिति वाच्यम् अपकर्षानाश्रयमहत्त्वस्य परममहत्त्वशब्दवाच्यत्व
वदपकर्षाश्रयमहत्त्वसामान्यस्याणुत्वशब्दवाच्यत्वं अतएव महानपि महत्तमादणुरिति
व्यवहारः एवमुत्कर्षानाश्रयमहत्त्वस्यैव परमाणुत्वशब्दवाच्यत्वं एवंच कपालादिपरि
माणस्य घटादिपरिमाणावधिकापकर्षाश्रयत्वादणुशब्दवाच्यत्वेपि कापालिकादि
परिमाणावधिकोत्कर्षाश्रयत्वान्न परमाणुत्वशब्दवाच्यत्वं त्र्यणुकपरिमाणस्य तु सक
लपरिमाणावधिकापकर्षाश्रयत्वात् किंचित्परिमाणावधिकोत्कर्षानाश्रयत्वाच्च परमा
णुत्वशब्दवाच्यत्वं तस्मात्परमाण्वादिद्रव्यसद्भावे प्रमाणाभावात् पूर्वोक्तोत्पत्तिक्रमनि
रूपणमसंगतमिति नवीनैकदेशिमतं निरसितुमादौ तन्मतं संक्षेपेणानुवदति किंपुनरिति

76

अत्र पुनः शाब्दोवाक्यालंकारे । किंशब्दः प्रमाणशब्दपूर्वपदोस्य: परमाणुसद्भावे परमाणुत्वादि
सद्भावे आदिना द्व्यणुकपरिग्रहः प्रमाणमिति इति चेदिति शेषः अनुवृत्ताकिंशब्दसहित
प्रमाणशब्देन किमपि प्रमाणं नास्तीति अर्थो लभ्यते जालसूर्येत्यादि जालसूर्यमरीच्यव
च्छेदेन परिदृश्यमानं उत्कर्षानाश्रयमहत्त्वाश्रयं यदित्यर्थः इदंच त्र्यणुकसद्भावे प्रमाणोप
न्यासाय ननु तेनरूपेण पक्षत्वेलाभायगौरवात् किंतु त्र्यणुकत्वमेव पक्षतावच्छेदकं अत्र
त्र्यणुकत्वं चतुरणुकजनकतावच्छेदकतया त्र्यणुकपदशक्यतावच्छेदकतया वा तिसिद्धो
जातिविशेषः न च पृथिवीत्वादिना सांकर्येण न तस्य जातित्वमिति वाच्यं पृथिवीत्वादि
व्याप्यजातिचतुष्टयांगीकारात् प्रकृते पृथिवीत्वव्याप्य त्र्यणुकत्वजात्यवच्छिन्नं पक्षी
कृत्य वक्ष्यमाणहेतुना सावयवत्वसाधनेन त्र्यणुकसावयवत्वादिति सिद्धौ तुल्यन्यायेन जलत्वा
दिव्याप्य त्र्यणुकत्वावच्छिन्नस्यापि सावयवत्वसिद्धिर्निराबाधेति बोध्यं एतेन जलते

77

ति अत्र उत्पन्नस्येति स्वरूपकीर्त्तनं अनुत्पन्नकार्य्ये ऽव्याप्रसिद्धेरिति बोध्यं संजिहीर्षाव
शादिति संहर्तुमिच्छा हस्तकारणेच्छावदात्मसंयोगरूपासमवायिकारणसहकृतादित्य
र्थः जन्यत्वे पंचम्यर्थः तस्य क्रियायामन्वयः क्रिययेति तृतीयार्थो जन्यत्वं तस्य विभागेऽन्व
यः द्व्यणुकनाश इति आरंभकसंयोगनाशपूर्वकद्व्यणुकनाश इत्यर्थः इत्येवमिति एता
दृशक्रमेणेत्यर्थः द्व्यणुकादिनाशः कार्य्यद्रव्यघटपटादिचतुष्टयनाश इत्यर्थः अस
मवायिकारणनाशादिति परमाणुद्वयसंयोगस्य नाशादित्यर्थः द्व्यणुकनाश इति समवा
यिकारणस्य परमाणोर्नाशासंभवादित्यर्थः समवायिकारणनाशादिति द्व्यणुकादिना
शादित्यर्थः त्र्यणुकनाश इति त्र्यणुकादिनाश इत्यर्थः इति संप्रदाय इति इति प्राचीनाभि
प्रांत इत्यर्थः अत्रोक्तरीत्या क्वचिदसमवायिकारणनाशस्य द्रव्यनाशकत्वे कार्यकारण
रूपकल्पनाप्रयुक्तगौरवमित्यस्वरसं हृदि निधाय संप्रदाय इत्युक्तमिति बोध्यं सर्वत्रेति

यव

षष्ठ्यर्थे सप्तमी कार्यद्रव्यमात्रस्येत्यर्थः एतस्य नाश इत्युत्तरेणान्वयः असमवायिकारणनाशादि
ति अवयवसंयोगनाशादेवेत्यर्थः नाश इति स्वीक्रियत इति शेषः तथा च तन्मते कार्यद्रव्यना
शमात्रे अवयवसंयोगनाशस्यैव हेतुतया कार्यकारणभावद्वयाप्रसक्तेः नोक्तगौरवमवका
शः इति भावः इतीति एतादृशार्थमित्यर्थः नवीना इति वदन्तीति शेषः अत्र द्व्यणुकादिनाशं
प्रत्यपि असमवायिकारणनाशस्य हेतुत्वस्वीकारे द्व्यणुकनाशानन्तरं द्व्यणुकसंयोगना
शः तदुत्तरक्षणे त्र्यणुकनाशस्य वाच्यतया तन्मते क्षणविलंबः समवायिकारणं विना
क्षणद्वयं द्रव्यस्थित्यापत्तिः प्राचीनमते तु द्व्यणुकनाशद्वितीयक्षण एव द्व्यणुकसंयो
गत्र्यणुकयोर्नाशस्वीकारात् नोक्तदोषप्रसक्तिरिति अस्वारस्यं हृदि निधाय नवीना इत्यु
क्तमिति विभाव्यम् ननु एकद्व्यादिजनुरुपस्य पूर्वोक्तोत्पत्तिक्रमोऽयुक्तः परमाणुद्व्यणुक
योर्मेलनाभावात् न चैवं सति द्व्यणुकसमवायिकारणाभावात् अनुत्पत्तिप्रसंग इति वाच्यं

विनाश
क्रमे

78

कविषयत्वव्यापकत्वस्वीकार इत्यर्थः तत्रवारिस्पतेजसोपीति उद्भूतस्पर्शाश्रयत्वात
नवीनमते त्वाचप्रत्यक्षविषयतादृशतेजसोपी त्यर्थः अपिना वायुः समुच्चीयते अप्र
त्यक्षत्वापत्तिरिति लौकिकविषयत्वशून्यत्वापत्तिरित्यर्थः तादृशतेजसि व्यापकीभू
तोद्भूतरूपाभावलिंगेन वह्निर्व्य।त्वादिशिवत् लौकिकविषयत्वाभावः सिध्यन्वह्नि
व्यत्वरूपविशेषनिर्णयसहकृतपरामर्शोत्केवललौकिकविषयत्वाभाव। त्वरूपव्या
पकतानवच्छेदकधर्मप्रकारेणैव सिध्यतीतिभावः इष्टत्वादिति तादृशतेजसो लौ
किकविषयत्वशून्यत्वस्य त्वादिः प्राचीनाभिमतत्वादित्यर्थः उपसंहरति तस्मादि
ति वायोः प्रत्यक्षत्वसाधकप्रमाणाभावादित्यर्थः स्वमते साधकलिंगमाह रूपरहित
त्वादिति उद्भूतरूपशून्यत्वादित्यर्थः अप्रत्यक्ष इति लौकिकविषयताशून्य इत्य

79

र्थः इदानीं पार्थिवत्वादिचतुष्टयवृत्तिएकत्वरूपसामान्यकल्पनानन्तरमित्यर्थः उत्पत्तिवि
नाशक्रम इति उत्पत्तिक्रमो विनाशक्रमश्चेत्यर्थः कथ्यत इति शिष्यबुद्धिवैशद्यायेत्या
दिः सप्रमाणमुच्यत इत्यर्थः ईश्वरस्येति तथा हीत्यादिः चिकीर्षावशादिति कर्तुमिच्छा
पहेतोरित्यर्थः अर्थेकारणजन्यत्वनियमेनापाक्रियां प्रति असमवायिकारणप्रति
द्व्यणुकेपि नत्वात्तिः समवायिकारणनिमित्तकारणाभ्यामेव तदुत्पत्तिस्वीकारादिति बोध्यं
अदृष्टवदात्मसंयोगस्यासमवायिकारणत्वं भवतिमानुष्यादिवैचि अहेतोरदृष्टस्या
वांतरप्रलयेपि जीवात्मगुणत्वात् तत्क्रियेति द्व्यणुकारंभानुगुणक्रियेत्यर्थः ततइति नाद
शक्रियानन्तरविभागजन्यपूर्वदेशसंयोगनाशादित्यर्थः उत्पत्तिक्रमरूपपाद्यनाश
क्रममनुपपादयति एवमिति उत्पत्तिक्रमकल्पनानन्तरमित्यर्थः उत्पन्नस्य कार्यद्रव्यस्ये

द्रव्यस्ये
२७
वे

४०
राम

यत्र पक्षश्च यर्थः द्रव्यत्वे सतीत्यादि समवायस्वरूपोभयघटितसामानाधिकरण्यसंबंधेन
वह्निद्रव्यत्वविशिष्टलौकिकविषयत्वमित्यर्थः तेन वह्नींद्रियजन्यप्रत्यक्षस्य मानसा
निरूपितलौकिकविषयतार्थत्वाभिमतस्य तादृशविषयतात्वेन साध्यत्वाभावात् उद्भूतरूप
स्पर्शद्रव्यत्वविशिष्टतादृशविषयतात्वावच्छिन्ननिरूपितव्यापकत्वोपादानस्योपाधि
त्वानिर्वाहकत्वेन व्यर्थ इति दूषणस्यानवकाशः यदि च मानसानिरूपितलौकिक
विषयत्वमेव साध्यतयाभिप्रेतं तदा यथाश्रुतमेव सम्यगिति बोध्यम् तत्रेति तादृश
सामानाधिकरण्यमर्थः इति साध्यव्यापकत्वमिति इत्याकारकपक्षधर्मविशिष्टसा
ध्यतावच्छेदकावच्छिन्ननिरूपितव्यापकत्वमित्यर्थः तथा चोद्भूतरूपस्य पक्षध
र्मावच्छिन्नसाध्यव्यापकत्वसत्त्वान्नोपाधित्वभंग इति भावः साधनाव्यापकत्वमिति
इदं चोपाधेर्व्यभिचारितासंबंधेन हेतुनिष्ठत्वप्रदर्शनाय न तु तस्यापि उपाधिशरीर

81

प्रविष्टत्वं प्रयोजनाभावादिति चेन्न। उद्भूतरूपस्य पक्षधर्मावच्छिन्नसाध्यव्यापकता
वत्त्वे केवलरूपस्यापि तादृशव्यापकत्वात् तत्तया केवलरूपत्वेनैवोपाधित्वसंभ
वात् उपाधितावच्छेदकशरीरे उद्भूतत्वनिवेशनमफलमिति चेन्न उपाधिपदस्य सा
ध्यव्यापकत्वावच्छिन्नेष्टत्वात् उपलक्षणमेतत् लिङ्गपदार्थेऽपि व्याप्तित्वरूपधर्म
मादधातीति योगेनोपाधिपदस्य साध्यव्यापकतावच्छिन्नार्थकत्वाच्च योगरूढ्यर्थ
तावच्छेदकधर्मरूपविशिष्टस्यैव मुख्योपाधित्वमिति प्राचीनमतानुसारेणोद्भूत
रूपत्वेनोपाधित्वमङ्गीकृतं न तु केवलरूपत्वेनोद्भूतरूपस्यापि न इत्यत्तावच्छिन्न
लौकिकविषयताव्यापकत्वं परमाणौ तद्धर्मिवेद्यमसीचाक्षुषत्वानुपपत्त्यादिति वाच्यं प्रकृ
ते उद्भूतरूपपदस्य लौकिकविषयताविशिष्टार्थकत्वात् परमाणौ तादृशरूपाभावे
न व्यभिचारप्रसक्तेरित्याशयः इदमिति उद्भूतरूपस्य बहिर्द्रव्यत्वविशिष्टलौकि

८२

त्वेमनसो महत्त्वाभावेन निरुक्तसंबंधेन तत्र महत्त्वाभावात् लौकिकविषयत्वाभावापत्त्या
ऽनुभववितेत्यादिग्रायवत्त्वसंभवेनानिष्टप्रसंजनात्मकस्तर्को व्यभिचारशंकानि
रासेसत्वनुमानामान्मनः समवेतत्वाभावासिद्धिरिति भावः तस्मादिति निरुक्तप
रिशेषानुमानादित्यर्थः निरुक्तस्पर्शाश्रयस्य प्रत्यक्षाग्राह्यद्रव्यातिरिक्तद्रव्यत्वसि
द्धाविति शेषः यः प्रतीयमान इति स्पर्शद्रव्यातिरिक्तद्रव्यत्वेन सिद्धः प्रतीयमानस्प
वे र्शाश्रय इत्यर्थः स वायुरिति एवकारो भिन्नक्रमः स एव वायुशब्देन व्यवह्रियत
इत्यर्थः इदानीं वायोः प्रत्यक्षत्वादिनवीनैकदेशीमतं दूषयितुं तन्मतमुपन्यस्य
ति नन्वित्यादिना प्रत्यक्ष इति लौकिकविषयतावानित्यर्थः प्रत्यक्षस्पर्शाश्रय
त्वादिति लौकिकविषयताश्रयस्पर्शवत्त्वादित्यर्थः एतेन वायोरपि वायावुद्भू
तरूपं नास्तीति चाक्षुषप्रत्यक्षत्तानिरूपिता लौकिकविषयत्वमादाय सिद्धसाधनवा

न.प्र.
८२

रणायप्रत्यक्षत्वानिरूपितलौकिकविषयत्वस्यैव [illegible]
[illegible] साधनीयतया तन्मात्रसाधने नैवेष्टसिद्धेः साध्ये प्रत्यक्षत्वनिरूपितत्वादि
शेषणं व्यर्थं एवं च पृथिवीपरमाणुसमवेतस्पर्शस्यापि स्पर्शत्वरूपसामान्यलक्षणा
जन्यालौकिकप्रत्यक्षत्वादिविषयतया व्यभिचारवारणाय प्रत्यक्षत्वनिरूपितलौकिकविष
यताश्रयस्पर्शवत्त्वस्यैव हेतुत्वेन वाच्यतया तद्घटकलौकिकविषयतायां प्रत्यक्षत्वनि
रूपितत्वविशेषणं नोपादेयं अन्यथा व्यर्थविशेषणघटितत्वेन व्याप्यत्वासिद्धत्वा
पत्तेरिति दूषणमपास्तम् दीधितिकारैः प्रत्यक्षत्वघटितत्वस्वीकारात् उद्भूत
रूपवत्त्वस्येति उद्भूतरूपा[illegible]र्थः उपाधित्वादिति ननु नायमुपाधिः लौकिकवि
षयत्वाधिकरणरूपादौ उद्भूतरूपाभावेन लौकिकविषयत्वरूपसाध्यव्यापकत्वा
भावादित्याशंकां दीधितिकृदीषदसाध्यव्यापकत्वमुपपाद्य परिहरतीति पत्रेति

८४

राम
८२

वेणव्यभिचारान्नसंभवति इत्युक्तं तद्रूपाभावहेतुनानिरुक्तभेदघपसाधनासंभ
वादित्वं तत्रानुसरणमिति बोध्यं न विभुवत्तुल्यमिति तादृशस्पर्शाधिकरणविभुचतुष्ट
यनेत्यर्थः तादृशस्पर्श आकाशादात्मांतान्यतमसमवेतत्वाभाववानित्यर्थः अत्र
गुणादिप्रविष्टशरीरावच्छेदप्रत्यक्षानिरूपितलौकिकविषयताशून्यविशेषगुण
रूप त्वात् घटादिवदिति सद्धेतौ तद्धेतुः रूपादिषु कालादिपतिमात्रे व्यभिचारवारणाय पह
तौ विशेषपदलं शब्दादौ व्यभिचारवारणाय सत्यंतमिति बोध्यम् निरुक्तहेतौ व्यभिचार
क घ्रं कानिवर्तितकं माह सर्वेत्रेति सः स्पर्शो यथा आकाशाद्यात्मांतान्यतमसमवेतविशेषगु
णः स्यात् तदेत्यादि गुणादिप्रविष्टशरीरावच्छेदप्रत्यक्षानिरूपितलौकिकविषयतावान्
स्यादित्यर्थः तथा च शब्दज्ञानादेस्तादृशविशेषगुणत्वात् केवलसामग्रीसत्वे यथा तादृ स
लौकिक शविषयतावत्वं तथा तादृशस्पर्शस्यापित्व बद्धं युक्ता ऽऽकाशादिसमवायसान्निकर्ष

85

न.प्र. ८१

बलात् तादृशलौकिकविषयतापत्त्या अनुभवविरोधादिदोषापत्त्यसंभवेनातिप्रसंज
नात्मकसत्तर्कात् व्यभिचारशंकानिरासे सति उक्तानुमानात्तादृशान्यतमसमवेतत्वाभा 86.
वसिद्धिर्निष्प्रत्यूहेति भावः न मनः इति तादृशस्पर्शाधिकरणं मनोभिन्नमित्यर्थः ताद

तिकारि शस्पर्शः मनःसमवेतत्वाभाववान् इत्यर्थः लौकिकविषयतावत्त्वात् घटरूपवदिति
सदृष्टांतहेतुः पूरणीयः उक्तानुमाने व्यभिचारशंकानिरासकतर्कमाह परमाणुस्प
र्शस्येति अत्र स्पर्शपदं गुणकर्मणोर्लक्षकं तथा च परमाणुसमवेतगुणादेरित्य
र्थः अतींद्रियत्वादिति लौकिकविषयताशून्यत्वादित्यर्थः तथा च इत्थं समवेतत्व
ति लौकिकविषयतां प्रति समवायघटितसामान्याधिकरण्यसंबंधेन महत्त्वस्य प्र
योजकतया परमाणुषु महत्त्वाभावात् न समवेतगुणादिषु तादृशसंबंधेन मह
त्त्वाभावात् यथा लौकिकविषयताभाववत्त्वात् तादृशस्पर्शस्यापि मनःसमवेत

राम ८१

घटाभावादिविषयकप्रमितिकारणत्वसंभव इत्यर्थः अनुपलब्धेरिति योग्यानुपलब्धेरित्यर्थः कारणत्व
स्येति घटाभावादिकारणत्वस्येत्यर्थः अप्रकृतत्वाच्चेति अप्रामाणिकत्वाच्चेत्यर्थः नन्वभावाधिकरणसंबंध
तया विशेषणतास्वीकारे अतिरिक्तपदार्थकल्पनागौरवं तन्मते परमवाशिष्यत इत्याशंकां [illegible] तदा
र्थांतर्भावप्रतिपादनेन परिहरति विशेषणविशेष्यभाव इति विशेषणताख्यसंनिकर्ष इत्यर्थः विशे
षणविशेष्यस्वरूप एवेति अभावस्वरूप एव आधिकरणस्वरूप एवेत्यर्थः एवकारार्थं वि
वृणोति नातिरिक्त इति विशेषणताख्यसान्निकर्षः नाभावाधिकरणाभ्यामतिरिक्तपदार्थ इ
त्यर्थः प्रत्यक्ष[illegible]ज्ञानमुपसंहरति मूले एवं सान्निकर्षजन्यामिति निरुक्तसान्नि
कर्षषट्कान्यतमजन्यज्ञानानामित्यर्थः कारणस्वरूपं दर्शयति तत्कारणमिंद्रियमिति
निरुक्तलक्षणलक्षितं प्रमाकारणमिंद्रियमेवेत्यर्थः प्रत्यक्षप्रमाणमुपसंहरति तस्मा
दिति इंद्रियस्य प्रमाकारणत्वादित्यर्थः इंद्रियं प्रत्यक्षप्रमाणमिति त्रिधामिति इंद्रियमेव

न.प्र.
१३४

प्रत्यक्षप्रमाणमितिशेषमित्यर्थः तत्करणमिंद्रियमित्यस्य प्रतीकमद्धृत्वा हेतुसंवलितार्थमा
हदीपिकायामसाधारणकारणत्वादिति प्रमितिनिरूपितव्यापारसंबंधावच्छिन्नकारणता
वत्वादित्यर्थः इदं च हेतुप्रदर्शनं प्रत्यक्षज्ञानकरणमित्यर्थ इति तत्करणमिति मूलस्यार्थ
इत्यर्थः श्रीश्री श्री इति श्रीदीपिकाप्रकाशे प्रत्यक्षपरिच्छेदः समाप्तः ॥ ॥ ॥

88

श्रीमते रामानुजाय नमः श्री

श्रीमद्रामानुजाय नमः

ते

राम